गुह्यनामसहस्रकं

नाम

उच्छिष्टमहागणपति-
सहस्रनामकम्

चौखम्बा सुरभारती प्रकाशन

वाराणसी

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
607

गुह्यनामसहस्रकं

नाम

उच्छिष्टमहागणपति-
सहस्रनामकम्

चौखम्बा सुरभारती प्रकाशन
वाराणसी

उच्छिष्टमहागणपतिसहस्रनामकम्

पृष्ठ : 4+204

ISBN : 978-93-85005-96-1

प्रकाशक

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के. 37/117 गोपालमन्दिर लेन

पो. बा. नं. 1129, वाराणसी 221001

दूरभाष : +91 542-2335263; 2335264

email : csp_naveen@yahoo.co.in

website : www.chaukhamba.co.in

© सर्वाधिकार प्रकाशकाधीन

प्रथम संशोधित संस्करण 2016 ई०

मूल्य : ₹ 150.00

अन्य प्राप्तिस्थान

चौखम्बा पब्लिशिंग हाउस

4697/2, भू-तल (ग्राउण्ड फ्लोर)

गली नं. 21-ए, अंसारी रोड

दरियागंज, नई दिल्ली 110002

दूरभाष : +91 11-23286537

email : chaukhambapublishinghouse@gmail.com

•

चौखम्बा संस्कृत प्रतिष्ठान

38 यू. ए. बंगलो रोड, जवाहर नगर

पो. बा. नं. 2113, दिल्ली 110007

•

चौखम्बा विद्याभवन

चौक (बैंक ऑफ बड़ौदा भवन के पीछे)

पो. बा. नं. 1069, वाराणसी 221001

विषय-सूची

१. उच्छिष्टमहागणपतिसहस्रनामकम् १

२. उच्छिष्टगणेशानसहस्रनामस्तोत्रं नाम गुह्यनामसहस्रकम् ११

३. उच्छिष्टगणेशसहस्रनामावलिः ४५

४. श्रीमहागणपतिचतुरावृत्तितर्पणक्रमः १२३

५. चतुरावृत्तितर्पणम् १३९

६. महागणपतिपञ्चावरणपूजा १५१

७. उच्छिष्टगणपतिपञ्चावरणपूजा........................... १६०

८. मन्त्रजालप्रकरणम् १६५

९. श्रीमहागणपतिनित्य-(काम्य-) होमविधानम्............ १७०

१०. श्रीदक्षिणामूर्तिस्तोत्रम् १९९

११. दशश्लोकी २०१

१२. मनीषापञ्चकम्... २०३

१३. श्रीजगद्गुर्वष्टकम्.. २०४

॥ श्रीः ॥

गुह्यनामसहस्रकं नाम

उच्छिष्टमहागणपतिसहस्रनामकम्

सनक उवाच—

देवदेव महादेव विद्यानाथ गुरूत्तम।
उपासनानि भिन्नानि बुद्धिभेदकृतानि तु॥१॥
कलौ हि धैर्यवैकल्यात् साधकं भ्रमयन्ति हि।
केनोपायेन लघुना लघुकालकृतेन च॥२॥
साधकाः सिद्धिजालानि प्राप्नुयुर्हि कलौ युगे।
तमहं ज्ञातुमिच्छामि भवन्मुखरसाकुलः॥३॥
यदि मे योग्यतास्तीति मन्यते भवता तदा।
आचक्ष्व करुणासिन्धो कौतुकं मे प्रपूरयन्॥४॥

दक्षिणामूर्तिरुवाच—

वत्स वत्स किमेवं हि ब्रूयते तु त्वयाधुना।
तव चेद्योग्यता नास्ति कस्यान्यस्येह योग्यता॥५॥
त्वादृशो यदि लोकेऽस्मिन् शिष्यो लभ्येत कर्हिचित्।
तदैव तस्मै शिष्याय गुरुः सर्वं प्रकाशयेत्॥६॥
भवान् हि त्रिषु लोकेषु ब्रह्मविद्याप्रचारणे।
श्रीविद्यायास्तथा च्छन्दोविद्यायाश्च प्रचारणे॥७॥

नियत्या हि नियुक्तोऽसि तन्त्रविद्याप्रचारणे।
अतः सर्वं प्रकाश्यं ते योग्य एवासि वत्सक॥ ८ ॥
यद्यद्विषयविज्ञानं प्रतीच्छा तव जायते।
तत्तद् विस्रब्धमेव त्वं मां पृच्छस्व निराकुलः॥ ९ ॥
कलौ हि क्षिप्रसिद्ध्यर्थं समस्त्येक उपायराट्।
उच्छिष्टगणनाथस्य राधनं क्षिप्रसिद्धिकृत्॥१०॥
उच्छिष्टस्य गणेशस्य पूजनं बहुधा श्रुतम्।
तन्मन्त्रा अपि बहवः श्रूयन्ते तन्त्रवेदिभिः॥११॥
हस्तिशब्दं समुच्चार्य पिशाचीति ततो वदेत्।
लिखे पदं समुच्चार्य वह्निजायान्तमुद्धरेत्॥१२॥
नवाक्षरोऽयमाख्यात उच्छिष्टस्य गणेशितुः।
ऋषिः कङ्कोल नामास्य विराट् छन्द उदाहृतम्॥१३॥
उच्छिष्टगणपो देवः सर्वसम्पत्प्रदायकः।
द्वाभ्यां हृदयमाख्यातं त्रिभिः शिर उदाहृतम्॥१४॥
द्वाभ्यां शिखा समाख्याता वर्म द्वाभ्यां समीरितम्।
समस्तेनास्त्रमाख्याातं पञ्चाङ्गविधिरीरितः॥१५॥
अत्राङ्गकल्पनायां हि नेत्रत्रयं न विद्यते।
वर्णलक्षं जपित्वा तु मन्त्रमेतं तु साधयेत्॥१६॥
आदौ षट्कोणमालिख्य ततो वसुदलद्वयम्।
चतुरस्त्रत्रिवीथीभिः सार्धं यन्त्रं समुद्धरेत्॥१७॥
पूजयित्वा यन्त्रराजं विधिनेमं सुभक्तितः।
सर्वसिद्धिसमृद्धश्रीः साधको भुवि जायते॥१८॥

मूलमन्त्राधिपं देवं मध्ये विन्दौ प्रपूजयेत्।
षट्कोणेषु षडङ्गानि पूजयेत्स्थिरमानसः॥१९॥
षडङ्गानि मनोरस्य ध्यातव्याश्चाङ्गदेवताः।
तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः ॥२०॥
वरदाभयधारिण्यः प्रधानतनवः स्त्रियः।
पञ्चाङ्गकमनुर्यत्र तत्र पञ्चारमालिखेत्॥२१॥
पूजापि तत्र कर्तव्या पञ्चाङ्गैरेव मन्त्रकैः।
आद्याष्टदलमूलेषु शक्तीरष्टौ क्रमाद्यजेत्॥२२॥
विद्याख्या विश्वधात्री च भोगदा विघ्ननाशिनी।
निधिप्रदा च पापघ्नी तथा पुण्या शशिप्रभा॥२३॥
दलेषु च यजेत्तद्वदणिमाद्या हि देवताः।
अणिमा महिमा चैव लघिमा गरिमा तथा॥२४॥
ईशित्वं च वशित्वं च प्राकाम्यं प्राप्तिरेव च।
द्वितीयाष्टदलाब्जस्य दलेषु क्रमशोऽष्टसु॥२५॥
वक्रतुण्डादिका देवाः सम्पूज्या गणपेश्वराः।
वक्रतुण्डैकदंष्ट्रौ च महोदरगजाननौ॥२६॥
लम्बोदराख्यविकटौ विघ्नराड्धूम्रवर्णकौ।
बहिरष्टदलाब्जस्य दलाग्रेष्वपि च क्रमात्॥२७॥
विधिना पूजनीया हि ब्राह्म्याद्यास्त्वष्टमातरः।
ब्राह्मीं माहेश्वरीं चैव कौमारीं वैष्णवीं तथा॥२८॥
वाराहीं च तथेन्द्राणीं चामुण्डां तदनन्तरम्।
महालक्ष्मीं च क्रमशः पूर्वादिषु हि पूजयेत्॥२९॥

चतुरस्रस्याद्यवीथ्यां द्वितीयायां तथापि च।
तृतीयायामपि तथा लोकपालाष्टकस्य तु॥३०॥
वाहनानि तथास्त्राणि दैवतानि प्रपूजयेत्।
इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्॥३१॥
सोम ईशानः पतयः पूर्वादीनां दिशां क्रमात्।
वज्रशक्ती दण्डखड्गौ पाशायुधं ततो ध्वजः॥३२॥
शङ्खस्तथा त्रिशूलश्च शस्त्राण्येषां यथाक्रमम्।
ऐरावतोऽजमहिषौ नरश्च मकरस्तथा॥३३॥
रुरुरश्वश्च वृषभो वाहनानि यथाक्रमम्।
पञ्चावरणकं यन्त्रमुच्छिष्टस्य गणेशितुः॥३४॥
पूजयित्वा विधानेन सर्वसिद्धीश्वरो भवेत्।
पञ्चावरणपूजेयमुच्छिष्टस्य गणेशितुः॥३५॥
नवानामपि मन्त्राणां साधारणतया स्मृतम्।
तत्तन्मन्त्रस्य साध्यस्य बिन्दुचक्रे प्रपूजनम्॥३६॥
साध्यस्य देवरूपस्य ध्याने त्वस्ति विशेषकः।
अन्यत्र साधारणता पञ्चावरणपूजने॥३७॥
मन्त्रमन्यं शृणोत्वद्य सावधानेन हि चेतसा।
क्रीं क्रीं पदं समुच्चार्य ह्रीं ह्रीं च पदमुच्चरेत्॥३८॥
हुङ्कारं सम्यगुच्चार्य घेघे शब्दमथोच्चरेत्।
फट्कारं स्वाहया युक्तं प्रणवाद्योऽयमीरितः॥३९॥
एकादशाक्षरः सम्यङ् मूलमन्त्रो गणेशितुः।
ऋष्यादिकं पुरा प्रोक्तं ध्यानपूजादिकं तथा॥४०॥

अन्यं मन्त्रं गणेशस्योच्छिष्टस्यास्य ब्रवीमि ते।
एकदंष्ट्रं चतुर्थ्यन्तं वदेद् हस्तिमुखं ततः॥४१॥
लम्बोदरपदं ङेन्तं उच्छिष्टेति पदं ततः।
आत्मनेऽङ्कुशबीजं च ग्लूङ्कारं भुवनेश्वरीम्॥४२॥
हुं घेघे पदमुच्चार्य स्वाहाकारं समुच्चरेत्।
सप्तविंशतिभिर्वर्णैः मन्त्रः प्रोक्तो गणेशितुः॥४३॥
ऋष्यादिध्यानपूजान्तं यथापूर्वं समाचरेत्।
मन्त्रान्तरं संशृणुष्वोच्छिष्टपूर्वगणेशितुः॥४४॥
ओङ्कारमुच्चरेदादौ नमो भगवते पदम्।
एकदंष्ट्राय सम्भाष्य हस्त्यन्ते मुखशब्दतः॥४५॥
लम्बोदरपदं ङेन्तं उच्छिष्टेति पदं ततः।
महात्मने पदं प्रोक्ता वदेदं कुशबीजकम्॥४६॥
ग्लूङ्कारं मायया युक्तं हुं घेघे च समुच्चरेत्।
स्वाहान्तो मनुराख्यातः सम्यक् षट्त्रिंशदक्षरः॥४७॥
ऋष्यादिकं पुरा प्रोक्तं षड्बीजैरङ्गकल्पना।
ध्यानपूजादिकं सर्वं मन्त्री पूर्ववदाचरेत्॥४८॥
बलिमन्त्रं गणेशस्य श्रुत्वा बुद्धौ हि धार्यताम्।
ओं गं हं क्लौं समुच्चार्य ग्लौं उच्छिष्टगणेपदम्॥४९॥
ततः शाय महायक्षायायं बलिरिति स्मृतः।
अनेन मनुना मांसं फलं वापि बलिं हरेत्॥५०॥
एतत्पूर्वोक्तमन्त्रेषु यथा ध्येयो गणाधिपः।
शृणोत्ववहितमना ध्यानश्लोकं तथाधुना॥५१॥

रम्योद्भिन्नारुणतरमणिव्रातसंशोभिकान्तिं
संबिभ्राणं करकिसलयैः पाशमप्यंकुशाह्वम्।
साभीतीष्टं त्रिनयनयुतं रक्तमाल्यांशुकाढ्यं
उच्छिष्टाख्यं गणपतिममुं संस्मरेत्पद्मसंस्थम्॥५२॥
अस्मिन् बलिमन्त्रे तु ध्याने स्यात्किंचिदन्तरम्।
चतुर्भुजं त्रिनेत्रं च रक्तवर्णं कराम्बुजैः॥५३॥
पाशांकुशौ मोदकानां पात्रं दन्तं च बिभ्रतम्।
कमलासन आसीनमुन्मत्तं गणनायकम्॥५४॥
ध्यायेदत्र बलेर्मन्त्र उच्छिष्टस्य गणेशितुः।
मनुमन्यं गणेशस्योच्छिष्टाख्यस्य महाप्रभोः॥५५॥
तव ब्रवीमि वात्सल्याच्छृणोत्विह कुमारक।
प्रणवो भुवनेशी च स्मृतिबिन्दुसमन्विता॥५६॥
ततो नवाक्षरश्चैव सम्प्रोक्तो द्वादशाक्षरः।
आदित्रयद्विरावृत्त्या हृदयादिषडङ्गकम्॥५७॥
ध्यानपूजाविधाने तु नवार्णकवदाचरेत्।
शृणु मन्त्रान्तरं वत्सोच्छिष्टाख्यस्य गणेशितुः॥५८॥
तारं हृदुच्छिष्टपदं गणेशाय नवाक्षरः।
एकोनविंशत्यर्णोऽयं मुन्याद्याः पूर्ववत्स्मृताः॥५९॥
त्र्यगद्वित्रिद्विद्विभिश्च मन्त्रार्णैः स्यात्षडङ्गकम्।
एतावत्सु हि मन्त्रेषु ब्रह्मचारितया स्थितः॥६०॥
ध्यातव्यः साधकैर्देव उच्छिष्टाख्यो गणेशिता।
इतः परतरं मन्त्रद्वितयं तस्य विद्यते॥६१॥

सप्ताधिकत्रिंशदर्णो द्वात्रिंशदक्षरोऽपि च।
अनयोर्हि द्वयोर्मन्वोरुच्छिष्टाख्यगणेशिता॥६२॥
विवस्त्रपत्न्यां सुरते प्रवृत्तत्वेन चिन्त्यते।
शुण्डाहस्तेन जयाया लालयंश्च कुचद्वयम्॥६३॥
महात्रिपुरसुन्दर्या यदायुधचतुष्टयम्।
तदेव धारयन्देवो ध्यातव्योऽत्र गणाधिपः॥६४॥
प्रणवं हृद्भगवते एकदंष्ट्राय वै वदेत्।
ततो हस्तिमुखं ङेन्तं तथा लम्बोदरं ततः॥६५॥
वदेदुच्छिष्टशब्दान्ते महात्मानं च ङेन्तगम्।
पाशमङ्कुशमाये च विघ्नबीजं च घेद्वयम्॥६६॥
वह्निजायावधिं सप्तत्रिंशदर्णो मनुर्मतः।
गिरिपंक्तिशराद्यब्धियुगार्णैरङ्गकल्पना ॥६७॥
तारो हस्तिमुखं ङेन्तं लम्बोदरपदं ततः।
तथोच्छिष्टमहात्मानं पाशांकुशत्रपास्ततः॥६८॥
कामत्रपावर्म घेघे उच्छिष्टायाग्निवल्लभा।
द्वात्रिंशदक्षरो मन्त्रो गणेशस्य महात्मनः॥६९॥
रसेषुसप्ताष्टयुगनेत्रार्णैरङ्गकल्पना ।
सप्तत्रिंशदर्णमन्त्रद्वात्रिंशदर्णयोर्द्वयोः ॥७०॥
गणकःस्यादृषिश्छन्दो गायत्री देवता ततः।
उच्छिष्टपदपूर्वश्च गणनाथः समीरितः॥७१॥
द्वात्रिंशदर्णको मन्त्रः सर्वतन्त्रेषु गोपितः।
जप्त्वा यं मन्त्रराजं तु सर्वसिद्धीश्वरो भवेत्॥७२॥
गुह्यनामसहस्राख्यस्तवपाठेऽपि योग्यता।

अस्यैव मन्त्रराजस्य राधनेन हि जायते॥७३॥
अष्टाविंशतिवर्णात्ममनुराट् साधकैरपि।
गुह्यनामसहस्रेऽस्मिन् संप्रवेष्टुं हि शक्यते॥७४॥
यत एष मनुश्रेष्ठः सर्वमन्त्रप्रसाधकः।
अष्टाविंशतिवर्णात्मा सर्वमन्त्रप्रवेशकः॥७५॥
सङ्गुप्तनामसाहस्रस्यादावेष प्रशस्यते।
सर्वेषामपि मन्त्राणामादावेष हि साध्यते॥७६॥
एकवर्णं समारभ्य यो यो मन्त्र उदीरितः।
तत्तस्मिन्हि निर्भीका मनुनानेन योग्यता॥७७॥
एकवर्णं समारभ्य यो यो मन्त्रः समीरितः।
तत्तस्मिह्नि गणेशान एतत्स्तोत्रेण पूज्यते॥७८॥
वत्साधुनातिगुप्तं हि गुह्यनामसहस्रकम्।
वक्ष्यामि भवतेऽद्यैव शृणु तत्परमानसः॥७९॥
यं श्रुत्वा सर्वलोकेषु नान्यज्ज्ञातव्यमस्ति ते।
यं श्रुत्वा सर्वलोकेषु नान्यच्छ्रोतव्यमस्ति ते॥८०॥
यं लब्ध्वा नापरं लाभं मन्यसे त्वं ततोऽधिकम्।
द्वात्रिंशदर्णके मन्त्रे यदृष्यादि समीरितम्॥८१॥
तदेवात्रानुसन्धेयं नामसाहस्रकेऽपि च।
यस्मिन् यस्मिंस्तु रूपे हि गणेशान उपास्यते॥८२॥
तत्तत्प्रसादलाभार्थं स्तुतिरेषा प्रयुज्यते।
उड्डामरेशतन्त्रेऽस्मिन् पटले क्षिप्रसाधने॥८३॥
सङ्गुप्तनामसाहस्रपूर्वभागः समाप्यते॥८४॥

॥ श्रीः ॥

अस्य श्रीगुह्यनामसहस्राख्यगणेशानसहस्रनामस्तोत्र-मालामहामन्त्रस्य

गणकः ऋषिः

गायत्री च्छन्दः

उच्छिष्टमहागणेशानो देवता॥

ओं बीजं

स्वाहा शक्तिः

गं कीलकम्॥

श्रीमदुच्छिष्टमहागणेशानप्रसादसिद्ध्यर्थे पारायणे विनियोगः॥

ओं हस्तिमुखाय अङ्गुष्ठाभ्यां नमः

हृदयाय नमः

लम्बोदराय तर्जनीभ्यां नमः

शिरसे स्वाहा

उच्छिष्टमहात्मने मध्यमाभ्यां नमः

शिखायै वँषट्

आं क्रों ह्रीं क्लीं ह्रीं हुं घे घे अनामिकाभ्यां नमः

कवचाय हुम्

उच्छिष्टाय कनिष्ठिकाभ्यां नमः

नेत्रत्रयाय वौषट्

स्वाहा करतलकरपृष्ठाभ्यां नमः

अस्त्राय फट्॥

भूर्भुवःसुवरोमिति दिग्बन्धः॥

ध्यानम्–शारचापगुणांकुशान् स्वहस्तैः
दधतं रक्तसरोरुहे निषण्णम्।
विगताम्बरजायया प्रवृत्तं
सुरते सन्ततमाश्रये गणेशम्॥

[अथवा–शरान् धनुः पाशसृणी स्वहस्तैः
दधानमारक्तसरोरुहस्थम् ।
विवस्त्रपत्न्यां सुरतप्रवृत्तं
उच्छिष्टमम्बासुतमाश्रयेऽहम्॥]

लं पृथिव्यात्मने गन्धं कल्पयामि नमः॥
हं आकाशात्मने पुष्पाणि कल्पयामि नमः॥
यं वाय्वात्मने धूपं कल्पयामि नमः॥
रं अग्न्यात्मने दीपं कल्पयामि नमः॥
वं अमृतात्मनेऽमृतं महानैवेद्यं कल्पयामि नमः॥
"सं सर्वात्मने समस्तोपचारपूजां कल्पयामि नमः"

यत्किञ्चिन्मधुमांसादि, प्रतिनिधित्वेन विहितं गुडमिश्र-दधि-मूलक-माष-लशुनादि वा निवेदितं फलपौष्कल्यं आदधाति॥ योनिमुद्रां गणेशानमुद्रासप्तकं च प्रदर्शयेत्॥ अपराजितापुष्पं करवीरकुसुमं च समर्पयेत्॥

अनन्तरं मूलमन्त्रं मातृकासम्पुटितमष्टोत्तरशतं जप्त्वा तदनन्तरं सहस्रनामस्तोत्रमेतत् पठितव्यमिति सम्प्रदायागतं रहस्यम्॥ स्तोत्रपठनान्ते केवलं मूलमन्त्रमष्टोत्तरशतं जप्त्वा, हृदयन्यासादिमुद्रादर्शनान्तं सर्वमपि पुनः कर्तव्यम्॥

॥ श्रीः ॥

उच्छिष्टगणेशानसहस्त्रनामस्तोत्रं नाम

गुह्यनामसहस्त्रकं

महागणाधिनाथाख्योऽष्टाविंशत्यक्षरात्मकः ।
तारश्रीशक्तिकन्दर्पभूस्मृतिबिन्दुसंयुतः ॥१॥
ङेन्तगणपतिप्रोक्तो वरवरदसंयुतः ।
सर्वजनद्वितीयान्त आदित्यशिवसंयुतः ॥२॥
वशमानयसंयुक्तो वह्निजायासमर्पितः ।
गणकमुनिसंदृष्टो निचृद्गायत्रभाषितः ॥३॥
सुरादिवन्द्यपादाब्जो मनुराजविजृम्भितः ।
इक्षुसागरमध्यस्थो रत्नद्वीपस्य मध्यगः ॥४॥
तरङ्गमालिकाधौतशीततरामलालयः ।
कल्पपादपसंशोभिमणिभूमिविराजितः ॥५॥
मृदुवातसमानीतदिव्यगन्धनिषेवितः ।
नानाकुसुमसङ्कीर्णः पक्षिवृन्दरवप्रियः ॥६॥
युगपदृतुषट्केन संसेवितपदद्वयः ।
नवरत्नसमाविद्धसिंहासनसमास्थितः ॥७॥

जपापुष्पतिरस्कारिरक्तकान्तिसमुज्ज्वलः ।
वल्लभाश्लिष्टवामाङ्ग एकादशकरान्वितः॥ ८ ॥
रत्नकुम्भाढ्यशुण्डाग्रो बीजापूरी गदाधरः।
इक्षुचापधरः शूली चक्रपाणिः सरोजभृत्॥ ९ ॥
पाशी धृतोत्पलः शालीमञ्जरीभृत् स्वदन्तभृत्।
पञ्चावरणचक्रेशो षडाम्नायप्रपूजितः॥१०॥
मूलमन्त्राढ्यपूजाको षडङ्गपरिवारितः।
परौघपूजनातुष्टो दिव्यौघादिनिषेवितः॥११॥
श्रीश्रीपतिसन्तुष्टो गिरिजातत्पतिप्रियः।
रतिंमन्मथसम्प्रीतो महीवराहपूजितः॥१२॥
ऋद्ध्यामोदप्रपूजाकः समृद्धितत्पतिप्रियः।
कान्तिसुमुखसुप्रीतो मदनावतिदुर्मुखः॥१३॥
मदद्रवा विघ्नपूज्यो द्राविणीविघ्नकर्तुकः।
वसुधाराशङ्खपूज्यो वसुमतिकपत्रकः॥१४॥
ब्राह्मीप्रिय ईश्वरीशो कौमारीसेवितांघ्रिकः।
वैष्णव्यर्चितपदद्वन्द्वो वाराहीसेवितांघ्रिकः॥१५॥
इन्द्राणीपूजितश्रीकश्चामुण्डाश्रितपादुकः ।
महालक्ष्मीमहामातृसम्पूजितपदद्वयः ॥१६॥
ऐरावतसमारूढवज्रहस्तेन्द्रपूजितः ।
अजोपरिसमारूढशक्तिहस्ताग्निसेवितः ॥१७॥
महिषारूढदण्डाढ्ययमदेवप्रपूजितः ।
नरारोहिखड्गहस्तनिर्ऋत्याश्रितपादुकः ॥१८॥

मकरवाहनारूढपाशाढ्यवरुणार्चितः ।
रुरोरुपरिसन्तिष्ठद्-ध्वजाढ्यश्वसनार्चितः ॥१९॥
अश्ववाहनशङ्खाढ्यसोमदेवप्रपूजितः ।
वृषभवाहनारूढत्रिशूलाढ्येशसेवितः ॥२०॥
पञ्चावरणपूजोद्यत्कारुण्याकुलमानसः ।
पञ्चावृतिनमस्याकभक्तवाञ्छाप्रपूरणः ॥२१॥
एकमूर्तिरष्टमूर्तिः पञ्चाशन्मूर्तिभेदकः ।
ब्रह्मचारिसमाख्याकः पत्नीसंयुतमूर्तिकः ॥२२॥
नग्नपत्नीसमाश्लिष्टः सुरतानन्दतुन्दिलः ।
सुमबाणेक्षुकोदण्डपाशांकुशवरायुधः ॥२३॥
कामिनीचुम्बनायुक्तसदालिङ्गनतत्परः ।
अण्डकर्णकपोलाख्यत्रिस्थानमदवारिराट् ॥२४॥
मदापोलुब्धमधुपैर्विचुम्बितकपोलकः ।
कामुकः कामिनीकान्तः कान्ताधरमधुव्रतः ॥२५॥
कामिनीहृदयाकर्षी वशागणनिषेवितः ।
ऐरावतादिदिङ्नागमिथुनाष्टकपूजितः ॥२६॥
सदा जायाश्रितोऽश्रान्तो नग्नोपासकपूजितः ।
मांसाशी वारुणीमत्तो मत्स्यभुङ् मैथुनप्रियः ॥२७॥
मुद्रासप्तकसम्प्रीतो मपञ्चकनिषेवितः ।
पञ्चाङ्गरागसुप्रीतः शृङ्गाररसलम्पटः ॥२८॥
कर्पूरवीटीसौगन्ध्यकल्लोलितककुप्तटः ।
उपासकवरिष्ठास्यवीट्या मौक्यनिरासकः ॥२९॥

योन्याहितसुशुण्डाको योनिलालनलालसः।
भगामोदसमाश्वासी भगचुम्बनलम्पटः॥३०॥
कान्ताकुचसमालिङ्गिशुण्डामण्डितविग्रहः।
उच्छिष्टाख्यगणेशान उच्छिष्टस्वादिसिद्धिदः॥३१॥
उच्छिष्टपूजनरत उच्छिष्टजपसिद्धिदः।
उच्छिष्टहोमसम्प्रीत उच्छिष्टव्रतधारकः॥३२॥
उच्छिष्टतर्पणप्रीत उच्छिष्टमार्जने रतः।
उच्छिष्टब्राह्मणकुलसन्तर्पणसुसाधितः॥३३॥
उच्छिष्टविघ्नराजेन्द्र उच्छिष्टवस्तुपूजितः।
उच्छिष्टमन्त्रसञ्ज्ञापिसर्वसिद्धिप्रकाशकः॥३४॥
उच्छिष्टोपचाररत उच्छिष्टोपास्तिसिद्धिदः।
मदिरानन्दसन्तोषी सदामत्तो मदोद्धतः॥३५॥
मधुराशी मधूद्रिक्तो मधुपानपरायणः।
मधुस्नानपरामोदो माधुर्यैकरसाश्रयः॥३६॥
मदिरासिन्धुसम्भूतः सुधामज्जनतत्परः।
मदिराम्बुधिसंस्थायी मदिरामज्जने रतः॥३७॥
मदिरातर्पणप्रीतो मदिरामार्जनादृतः।
मदिरामोदसन्तोषी मदिरामोदलोलुपः॥३८॥
कादम्बरीरसोन्मत्तः कादम्बरीप्रियाश्रितः।
द्राक्षारससमाह्लादी द्राक्षारसमदोल्बणः॥३९॥
वारुणीमदघूर्णाम्बो वारुणीमदविह्वलः।
नारिकेलरसास्वाःदी नारिकेलमधुप्रियः॥४०॥

तालफलरसोन्मत्तस्तालः मद्यपरायणः।
पानसमद्यसुप्रीतः कदलीमद्यपानकः॥४१॥
दाडिमीरससम्प्रीतो गौडपानकलम्पटः।
पौष्पीपानसदामत्तः पौष्पीकरण्डमण्डितः॥४२॥
युवतीसुरतासक्तो युवतीमणिते रतः।
मोदप्रमोदकृत्सङ्गो भैरवानन्दवत्सलः॥४३॥
शुक्लसेव्यः शुक्लतुष्टः शुक्लसिद्धिवरप्रदः।
शुक्लधातुमहःपूज्य ओजश्शक्तिप्रकाशनः॥४४॥
शुक्रादिमान्त्रिकैर्धुर्यैरर्धरात्रप्रपूजितः।
मुक्तकच्छो मुक्तकेशो नग्नकान्तासमाश्रितः॥४५॥
ताम्बूलचर्वणायुक्तः कर्पूरवीटिकामदः।
कान्ताचर्वितताम्बूलरसास्वादनलम्पटः॥४६॥
विशेषतः कलियुगे सिद्धिदः सुरपादपः।
महापद्मादिखर्वान्तनिधिपौष्कल्यपोषकः॥४७॥
स्वल्पायाससुसम्प्रीतः कलौ तूर्णफलप्रदः।
पितृकाननसंस्थायी पितृकाननसिद्धिदः॥४८॥
माचीपत्रसमाराध्यो बृहतीपत्रतोषितः।
दूर्वायुग्मनमस्याको धुत्तूरदलपूजितः॥४९॥
विष्णुक्रान्तसपर्याको गण्डलीपत्रसेवितः।
अर्कपत्रसुसंराध्योऽर्जुनपत्रकपूजितः॥५०॥
नानापत्रसुसम्प्रीतो नानापुष्पसुसेवितः।
सहस्रार्चनपूजायां सहस्रकमलप्रियः॥५१॥

पुन्नागपुष्पसम्प्रीतो मन्दारकुसुमप्रियः।
बकुलपुष्पसन्तुष्टो धुत्तूरसुमशेखरः॥५२॥
रसालपुष्पसंशोभी केतकीपुष्पसुप्रियः।
पारिजातप्रसूनाढ्यो माधवीकुन्दतोषितः॥५३॥
शम्यालङ्कारसुप्रीतोऽमृणालपाटलीप्रियः।
लक्षपङ्कजपूजायामणिमादिप्रसाधकः॥५४॥
संहितापदपाठादिघनान्तज्ञानदायकः।
अष्टावधानसन्धायी शतावधानपोषकः॥५५॥
साहस्रिकावधानश्रीपरिपाटीप्रवर्धनः।
मनश्चिन्तितविज्ञाता मनसा चिन्तितप्रदः॥५६॥
भक्तत्राणव्यग्रचित्तः स्मृतिमात्राभयप्रदः।
स्मृतिमात्राखिलत्राता साधकेष्टदतल्लजः॥५७॥
स्वसाधकविपक्षच्छिद् विपक्षजनभक्षकः।
व्याधिहन्ता व्यथाहन्ता महाव्याधिविनाशनः॥५८॥
पैत्तिकार्तिप्रशमनः श्लैष्मिकस्य विनाशकः।
वातिकज्वरविध्वंसी शूलगुल्मादिनाशनः॥५९॥
नेत्ररोगप्रशमनो नित्यज्वरविनाशनः।
कासादिव्याधिसंहर्ता सर्वज्वरविनाशनः॥६०॥
आधिहन्ता तमोहन्ता सर्वापद्विनिवारकः।
धनदायी यशोदायी ज्ञानदायी सुरद्रुमः॥६१॥
कल्यत्वदायकश्चिन्तामणिरायुष्यदायकः।
परकायप्रवेशादियोगसिद्धिविधायकः॥६२॥

महाधनित्वसन्धाता धराधीशत्वदायकः।
तापत्रयाग्निसन्तप्तसमाह्लादनकौमुदी ॥६३॥
जन्मव्याधिजरामृत्युमहाव्याधिविनाशकः ।
संसारकाननच्छेत्ता ब्रह्मविद्याप्रकाशकः॥६४॥
संसारभयविध्वंसिपराकामकलावपुः ।
उच्छिष्टाख्यगणाधीशो वामाचरणपूजितः॥६५॥
नवाक्षरीमन्त्रराजो दशवर्णकमन्त्रराट्।
एकादशाक्षरीरूपः सप्तविंशतिवर्णकः॥६६॥
षट्त्रिंशदर्णसम्पूज्यो बलिमन्त्रप्रपूजितः।
द्वादशाक्षरसन्निष्ठ एकोनविंशतीष्टदः॥६७॥
सप्तवर्णाधिकत्रिंशदर्णमन्त्रस्वरूपकः ।
द्वात्रिंशदक्षरारूढोऽदक्षिणाचारसेवितः ॥६८॥
पञ्चावृतिकयन्त्रोद्धवरिवस्याविधिप्रियः ।
नववर्णादिमन्त्रौघसम्प्रपूजितपादुकः ॥६९॥
परौघीयगुरुव्यूहसन्तर्पणसुसाधितः ।
महत्पदसमायुक्तपादुकापूजनप्रियः ॥७०॥
दक्षिणाभिमुखेशस्य पूजनेन वरप्रदः।
दिव्यवृन्दसिद्धवृन्दमानवौघनिषेवितः ॥७१॥
त्रिवारं मूलमन्त्रेण बिन्दुचक्रे सुतर्पितः।
षडङ्गदेवतापूज्यः षणमुखाम्नायराजितः॥७२॥
तुषारसमशोभाकहृदयाम्बानमस्कृतः ।
स्फटिकाश्मसमानश्रीशिरोदेवीनिषेवितः ॥७३॥

श्यामशोभासमुज्जृम्भिशिखादेवीप्रपूजितः ।
इन्द्रनीलमणिच्छायकवचाम्बापरीवृतः ॥७४॥
कृष्णवर्णसुशोभिश्रीनेत्रमातृसमावृतः ।
आरुण्यौघनदीमज्जदस्त्राम्बासेवितांघ्रिकः ॥७५॥
वसुदलाब्जमूलेषु शक्त्यष्टकसमन्वितः ।
विद्यापूज्यो विश्वधात्रीभोगदार्चितपादुकः ॥७६॥
विघ्ननाशिकया पूज्यो निधिप्रदापरीवृतः ।
पापघ्निकापूज्यपादः पुण्यादेवीनिषेवितः ॥७७॥
अन्वर्थनामसंराजिशशिप्रभाप्रपूजितः ।
दलाष्टकस्य मध्येषु सिद्ध्यष्टकपरीवृतः ॥७८॥
अणिम्नीपूजितपदो महिम्न्यर्चितपादुकः ।
लघिम्नीचिन्तितपदो गरिम्णीपूजितांघ्रिकः ॥७९॥
ईशित्वार्चितदेवेन्द्रो वशित्वार्चितवैभवः ।
प्राकाम्यदेवीसम्प्रीतः प्राप्तिसिद्धिप्रपूजितः ॥८०॥
बाह्याष्टदलराजीवे वक्रतुण्डादिरूपकः ।
वक्रतुण्ड एकदंष्ट्रो महोदरो गजाननः ॥८१॥
लम्बोदराख्यो विकटो विघ्नराड् धूम्रवर्णकः ।
बहिरष्टदलाग्रेषु ब्राह्म्यादिमातृसेवितः ॥८२॥
मृगचर्मावृतस्वर्णकान्तिब्राह्मीसमावृतः ।
नृकपालादिसंबिभ्रच्चन्द्रगौरमहेशिकः ॥८३॥
इन्द्रगोपारुणच्छायकौमारीवन्द्यपादुकः ।
नीलमेघसमच्छायवैष्णवीसुपरिष्कृतः ॥८४॥

अञ्जनाद्रिसमानश्रीवाराहीपर्यलंकृतः ।
इन्द्रनीलप्रभापुञ्जलसदिन्द्राणिकायुतः ॥८५॥
शोणवर्णसमुल्लासिचामुण्डार्चितपादुकः ।
स्वर्णकान्तितिरस्कारिमहालक्ष्मीनिषेवितः ॥८६॥
ऐरावतादिवज्रादिदेवेन्द्रादिप्रपूजितः ।
पञ्चावृतिनमस्यायामणिमादिप्रकाशकः ॥८७॥
सङ्कुप्तविद्यः सङ्कुप्तवरिवस्याविधिप्रियः ।
वामाचरणसुप्रीतः क्षिप्रसन्तुष्टमानसः ॥८८॥
कोङ्काचलशिरोवर्ती कोङ्काचलजनप्रियः ।
कोङ्काम्बुदजलास्वादी कावेरीतीरवासकः ॥८९॥
जाह्नवीमज्जनासक्तः कालिन्दीमज्जने रतः ।
शोणभद्राजलोद्भूतः शोणपाषाणरूपकः ॥९०॥
सरय्वापप्रवाहस्थः नर्मदावारिवासकः ।
कौशिकीजलसंवासश्चन्द्रभागाम्बुनिष्ठितः ॥९१॥
ताम्रपर्णीतटस्थायी महासारस्वतप्रदः ।
महानदीतटावासो ब्रह्मपुत्राम्बुवासकः ॥९२॥
तमसातमआकारो महातमोऽपहारकः ।
क्षीरापगातीरवासी क्षीरनीरप्रवर्धकः ॥९३॥
कामकोटीपीठवासी शङ्करार्चितपादुकः ।
ऋश्यशृङ्गपुरस्थायी सुरेशार्चितवैभवः ॥९४॥
द्वारकापीठसंवासी पद्मपादार्चितांघ्रिकः ।
जगन्नाथपुरस्थायी तोटकाचार्यसेवितः ॥९५॥

ज्योतिर्मठालयस्थायी हस्तामलकपूजितः।
विद्याभोगयशोमोक्षयोगलिङ्गप्रतिष्ठितः ॥ ९६ ॥
पञ्चलिङ्गप्रतिष्ठायी द्वादशलिङ्गसंस्थितः।
कोलाचलपुरस्थायी कामेशीनगरेश्वरः॥ ९७ ॥
ज्वालामुखीमुखस्थायी श्रीशैलकृतवासकः।
लङ्केश्वरः कुमारीशः काशीशो मथुरेश्वरः॥ ९८ ॥
मलयाद्रिशिरोवासी मलयानिलसेवितः।
शोणाद्रिशिखरारूढः शोणाद्रीशप्रियङ्करः॥ ९९ ॥
जम्बूवनान्तमध्यस्थो वल्मीकपुरमध्यगः।
पञ्चाशत्पीठनिलयो पञ्चाशदक्षरात्मकः॥१००॥
अष्टोत्तरशतक्षेत्रोऽष्टोत्तरशतपूजितः ।
रत्नशैलकृतावासः शुद्धज्ञानप्रदायकः॥१०१॥
शातकुम्भगिरिस्थायी शातकुम्भोदरस्थितः।
गोमयप्रतिमाविष्टः श्वेतार्कतनुपूजितः॥१०२॥
हरिद्राबिम्बसुप्रीतो निम्बबिम्बसुपूजितः।
अश्वत्थमूलसंस्थायी वटवृक्षाधरस्थितः॥१०३॥
निम्बवृक्षस्य मूलस्थः प्रतिग्रामाधिदैवतम्।
अश्वत्थनिम्बसंयोगे प्रियालिङ्गितमूर्तिकः॥१०४॥
गम्बीजरूप एकार्णो गणाध्यक्षो गणाधिपः।
ग्लौम्बीजाख्यो गणेशानो गोङ्कार एकवर्णकः॥१०५॥
विरिरूपो विघ्नहन्ता दृष्टादृष्टफलप्रदः।
पत्नीवराङ्गसत्पाणिः सिन्दूराभः कपालभृत्॥१०६॥

लक्ष्मीगणेशो हेमाभ एकोनत्रिंशदक्षरः।
वामाङ्गाविष्टलक्ष्मीको महाश्रीप्रविधायकः॥१०७॥
त्र्यक्षरः शक्तिगणपः सर्वसिद्धिप्रपूरकः।
चतुरक्षरशक्तीशो हेमच्छायस्त्रिणेत्रकः॥१०८॥
क्षिप्रप्रसादपंक्त्यर्णो रक्ताभः कल्पवल्लिभृत्।
पञ्चवक्त्रः सिंहवाहो हेरम्बश्चतुरर्णकः॥१०९॥
सुब्रह्मण्यगणेशानो धात्वर्णः सर्वकामदः।
अरुणाभतनुश्रीकः कुक्कुटोद्यत्करान्वितः॥११०॥
अष्टाविंशतिवर्णात्ममन्त्रराजसुपूजितः ।
गन्धर्वसिद्धसंसेव्यो व्याघ्रद्विपादिभीकरः॥१११॥
मन्त्रशास्त्रमहोदन्वत्समुद्यतकलानिधिः ।
जनसम्बाधसम्मोही नवद्रव्यविशेषकः॥११२॥
कामनाभेदसंसिद्धविविधध्यानभेदकः ।
चतुरावृत्तिसन्तृप्तिप्रीतोऽभीष्टसमर्पकः ॥११३॥
चन्द्रचन्दनकाश्मीरकस्तूरीजलतर्पितः ।
शुण्डाग्रजलसन्तृप्तिकैवल्यफलदायकः ॥११४॥
शिरःकृतपयस्तृप्तिसर्वसम्पद्विधायकः ।
गुह्यदेशमधुद्रव्यसन्तृप्त्या कामदायकः॥११५॥
नेत्रद्वयमधुद्रव्यतृप्त्याकृष्टिविधायकः ।
पृष्ठदेशघृतद्रव्यतृप्तिभूपवशङ्करः ॥११६॥
एरण्डतैलसन्तृप्तिरण्डाकर्षकनाभिकः ।
ऊरुयुग्मकतैलीयतर्पणातिप्रमोदितः ॥११७॥

प्रीतिप्रवर्धकांसीयपयःपयःप्रतर्पणः ।
धर्मवर्धकतुण्डीयद्रव्यत्रयसुतर्पणः ॥११८॥
अष्टद्रव्याहुतिप्रीतो विविधद्रव्यहोमकः।
ब्राह्ममुहूर्तनिष्पन्नहोमकर्मप्रसादितः ॥११९॥
मधुद्रव्यकहोमेन स्वर्णसमृद्धिवर्धकः।
गोदुग्धकृतहोमेन गोसमृद्धिविधायकः॥१२०॥
आज्याहुतिकहोमेन लक्ष्मीलासविलासकः।
शर्कराहुतिहोमेन काष्ठाष्टकयशप्रदः॥१२१॥
दधिद्रव्यकहोमेन सर्वसम्पत्तिदायकः।
शाल्यन्नकृतहोमेनान्नसमृद्धिवितारकः ॥१२२॥
सतण्डुलतिलाहुत्या द्रव्यकदम्बपूरकः।
लाजाहुतिकहोमेन दिगन्तव्याषिकीर्तिदः॥१२३॥
जातीप्रसूनहोमेन मेधाप्रज्ञाप्रकाशकः।
दूर्वात्रिकीयहोमेन पूर्णायुःप्रतिपादकः॥१२४॥
सुपीतसुमहोमेन वैरिभूपतिशिक्षकः।
विभीतकसमिद्धोमैः स्तम्भोच्चाटनसिद्धिदः॥१२५॥
अपामार्गसमिद्धोमैः पण्ययोषावशङ्करः।
एरण्डकसमिद्धोमैः रण्डासङ्घवशङ्करः॥१२६॥
निम्बद्रुदलहोमेन विद्वेषणविधायकः।
घृताक्तदौग्धशाल्यन्नहोमैरिष्टफलप्रदः ॥१२७॥
तिलादिचतुराहुत्या सर्वप्राणिवशङ्करः।
नानाद्रव्यसमिद्धोमैराकर्षणादिसिद्धिदः॥१२८॥

त्रैलोक्यमोहनो विघ्नस्त्र्यधिकत्रिंशदर्णकः।
द्वादशाक्षरशक्तीशः पत्नीवराङ्गहस्तकः॥१२९॥
मुक्ताचन्द्रौघदीप्ताभो विरिविघ्नेशपद्धतिः।
एकादशाक्षरीमन्त्रोल्लासी भोगगणाधिपः॥१३०॥
द्वात्रिंशदर्णसंयुक्तो हरिद्रागणपो महान्।
जगत्त्रयहितो भोगमोक्षदः कविताकरः॥१३१॥
षडर्णः पापविध्वंसी सर्वसौभाग्यदायकः।
वक्रतुण्डाभिधः श्रीमान् भजतां कामदो मणिः॥१३२॥
मेघोल्कादिमहामन्त्रः सर्ववश्यफलप्रदः।
आथर्वणिकमन्त्रात्मा रायस्पोषादिमन्त्रराट्॥१३३॥
वक्रतुण्डेशगायत्रीप्रतिपादितवैभवः ।
पिण्डमन्त्रादिमालान्तसर्वमन्त्रौघविग्रहः ॥१३४॥
सञ्ज्ञप्तिहोमसंतृप्तिसेकभोजनसाधितः ।
पञ्चाङ्गकपुरश्चर्योऽर्णलक्षजपसाधितः ॥१३५॥
कोट्यावृत्तिकसञ्ज्ञप्तिसिद्धीश्वरत्वदायकः ।
कृष्णाष्टमीसमारब्धमासेनैकेन साधितः॥१३६॥
मातृकया पुटीकृत्य मासेनैकेन साधितः।
भूतलिप्या पुटीकृत्य मासेनैकेन साधितः॥१३७॥
त्रिषष्ट्यक्षरसंयुक्तमातृकापुटसिद्धिदः ।
कृष्णाष्टमीसमारब्धदिनसप्तकसिद्धिदः ॥१३८॥
अर्केन्दुग्रहकालीनजपाज्झटितिसिद्धिदः ।
निशात्रिकालपूजाकमासेनैकेन सिद्धिदः॥१३९॥

मन्त्राणौंषधिनिष्पन्नगुटिकाभिः सुसिद्धिदः।
सूर्योदयसमारम्भदिनेनैकेन साधितः॥१४०॥
सहस्रारारम्बुजारूढदेशिकस्मृतिसिद्धिदः।
शिवोहंभावनासिद्धसर्वसिद्धिविलासकः ॥१४१॥
पराकामकलाध्यानसिद्धीश्वरत्वदायकः ।
अकारोऽग्रियपूजाकोऽमृतानन्ददायकः ॥१४२॥
अनन्तोऽनन्तावतारेष्वानन्ताफलदायकः।
अष्टाङ्गपातसम्प्रीतोऽष्टविधमैथुनप्रियः ॥१४३॥
अष्टपुष्पसमाराध्योऽष्टाध्यायीज्ञानदायकः।
आरब्धकर्मनिर्विघ्नपूरयिताऽऽक्षपाटिकः ॥१४४॥
इन्द्रगोपसमानश्रीरिक्षुभक्षणलालसः ।
ईङ्कारवर्णसम्बुद्धपराकामकलात्मकः ॥१४५॥
ईशानपुत्र ईशान ईषणात्रयमार्जकः।
उद्दण्ड उग्र उदग्र उण्डेरकबलिप्रियः॥१४६॥
ऊर्जस्वानूष्मलमद ऊहापोहदुरासदः।
ऋजुचित्तैकसुलभ ऋणत्रयविमोचकः॥१४७॥
ऋगर्थवेत्ता ऋकार ॠकाराक्षररूपधृक्।
लृवर्णरूपो लॄवर्णो लॄकाराक्षरपूजितः॥१४८॥
एधिताखिलभक्तश्रीरेधिताखिलसंश्रयः ।
एकाररूप ऐकार ऐंपुटस्मृतिबिन्दुकः॥१४९॥
ओङ्कारवाच्य ओङ्कार ओङ्काराक्षररूपधृक्।
औङ्काराढ्यगभूयुक्त औंपूर्वयुग्गकारकः॥१५०॥

अंशांशिभावसन्दृष्टोंशांशिभावविवर्जितः।
अःकारान्तसमस्ताच्कवर्णमण्डलपूजितः ॥१५१॥
कतृतीयविसर्गाढ्यः कतृतीयार्णकेवलः।
कर्पूरतिलकोद्भासिललाटोर्ध्वप्रादेशकः॥१५२॥
खल्वाटभूमिसंरक्षी खल्वाटबुद्धिभेषजम्।
खट्वाङ्गायुधसंयुक्तः खड्गोद्यतकरान्वितः॥१५३॥
खण्डिताखिलदुर्भिक्षः खनिलक्ष्मीप्रदर्शकः।
खदिराधिकसाराढ्यः खलीकृतविपक्षकः॥१५४॥
गान्धर्वविद्याचतुरो गन्धर्वनिकरप्रियः।
घपूर्वबीजसन्निष्ठो घोरघर्घरबृंहितः॥१५५॥
घण्टानिनादसन्तुष्टो घार्णो घनागमप्रियः।
चतुर्वेदेषु सङ्गीतश्चतुर्थवेदनिष्ठितः॥१५६॥
चतुर्दशकसंयुक्तचतुर्युक्तचतुश्शतः ।
चतुर्थीपूजनप्रीतश्चतुरात्मा चतुर्गतिः॥१५७॥
चतुर्थीतिथिसम्भूतश्चतुर्वर्गफलप्रदः ।
छत्रीच्छद्मच्छलश्छन्दोवपुश्छन्दावतारकः ॥१५८॥
जगद्बन्धुर्जगन्माता जगद्रक्षी जगन्मयः।
जगद्योनिर्जगद्रूपो जगदात्मा जगन्निधिः॥१५९॥
जरामरणविध्वंसी जगदानन्ददायकः।
जागुडानुकृतिच्छायो जाग्रदादिप्रकाशकः॥१६०॥
जाम्बूनदसमच्छायो जपसम्प्रीतमानसः।
जपयोगसुसंवेद्यो जपतत्परसिद्धिदः॥१६१॥

जपाकुसुमसंकाशो जातीपूजकवाक्प्रदः।
जयन्तीदिनसुप्रीतो जयन्तीपूजितांघ्रिकः॥१६२॥
जगद्धानतिरस्कारी जगद्धानतिरोहितः।
जगद्रूपमहामायाधिष्ठानचिन्मयात्मकः॥१६३॥
झंझानिलसमश्वासी झिल्लिकासमकान्तिकः।
झलझ्झलासुसंशोभिशूर्पाकृतिद्विकर्णकः ॥१६४॥
टङ्ककर्मविनाभावस्वयम्भूतकलेवरः ।
ठक्कुरष्ठक्कुराराध्यष्ठक्कुराकृतिशोभितः॥१६५॥
डिण्डिमस्वनसंवादी डमरुप्रियपुत्रकः।
ढक्कावादनसन्तुष्टो ढुण्ढिराजविनायकः॥१६६॥
तुन्दिलस्तुन्दिलवपुस्तपनरतापरोपहा ।
तारकब्रह्मसंस्थानस्तारानायकशेखरः ॥१६७॥
तारुण्याढ्यवधूसङ्गी तत्त्ववेत्ता त्रिकालवित्।
स्थूलः स्थूलकरः स्थेयः स्थितिकर्ता स्थितिप्रदः॥१६८॥
स्थाणुः स्थिरः स्थलेशायी स्थण्डिलकुलपूजितः।
दुःखहन्ता दुःखदायी दुर्भिक्षादिविनाशकः॥१६९॥
धनधान्यप्रदो ध्येयो ध्यानस्तिमितलोचनः।
धीरोधीर्धीरधीर्धुर्यो धुरीणत्वप्रदायकः॥१७०॥
ध्यानयोगैकसन्दृष्टो ध्यानयोगैकलम्पटः।
नारायणप्रियो नस्यो नरनारीजनाश्रयः॥१७१॥
नग्नपूजनसन्तुष्टो नग्ननीलासमावृतः।
निरञ्जनो निराधारो निर्लेपो निरवग्रहः॥१७२॥

निशीथिनीनमस्याको निशीथिनीजपप्रियः।
नामपारायणप्रीतो नामरूपप्रकाशकः॥१७३॥
पुराणपुरुषः प्रातस्सन्ध्यारुणवपुप्रभः।
फुल्लपुष्पसमूहश्रीसम्भूषितसुमस्तकः ॥१७४॥
फाल्गुनानुजपूजाकः फेत्कारतन्त्रवर्णितः।
ब्राह्मणादिसमाराध्यो बालपूज्यो बलप्रदः॥१७५॥
बाणार्चितपदद्वन्द्वो बालकेलिकुतूहलः।
भवानीहृदयानन्दी भावगम्यो भवात्मजः॥१७६॥
भवेशो भव्यरूपाढ्यो भार्गवेशो भृगोः सुतः।
भव्यो भव्यकलायुक्तो भावनावशतत्परः॥१७७॥
भगवान् भक्तिसुलभो भयहन्ता भयप्रदः।
मायावी मानदो मानी मनोभिमानशोधकः॥१७८॥
महाहवोद्यतक्रीडो मन्दहासमनोहरः।
मनस्वी मानविध्वंसी मदलालसमानसः॥१७९॥
यशस्वी यशआशंसी याज्ञिको याज्ञिकप्रियः।
राजराजेश्वरो राजा रामो रमणलम्पटः॥१८०॥
रसराजसमास्वादी रसराजैकपूजितः।
लक्ष्मीवान् लक्ष्मसम्पन्नो लक्ष्यो लक्षणसंयुतः॥१८१॥
लक्ष्यलक्षणभावस्थो लययोगविभावितः।
वीरासनसमासीनो वीरवन्द्यो वरेण्यदः॥१८२॥
विविधार्थज्ञानदाता वेदवेदान्तवित्तमः।
शिखिवाहसमारूढः शिखिवाहननाथितः॥१८३॥

श्रीविद्योपासनप्रीतः श्रीविद्यामन्त्रविग्रहः।
षडाधारक्रमप्रीतः षडाम्नायेषु संस्थितः॥१८४॥
षड्दर्शनीपारदृश्वा षडध्वातीतरूपकः।
षडूर्मिबृन्दविध्वंसी षट्कोणमध्यबिन्दुगः॥१८५॥
षट्त्रिंशत्तत्त्वसन्निष्ठः षट्कर्मसङ्घसिद्धिदः।
षड्वैरिवर्गविध्वंसिविघ्नेश्वरगजाननः ॥१८६॥
सत्ताज्ञानादिरूपाढ्यः साहसाद्भुतखेलनः।
सर्परूपधरःसंवित् संसाराम्बुधितारकः॥१८७॥
सर्पसङ्घसमाश्लिष्टः सर्पकुण्डलितोदरः।
सप्तविंशतिऋक्पूज्यः स्वाहायुङ्मन्त्रविग्रहः॥१८८॥
सर्वकर्मसमारम्भसम्पूजितपदद्वयः ।
स्वयम्भूः सत्यसङ्कल्पः स्वयंप्रकाशमूर्तिकः॥१८९॥
स्वयम्भूलिङ्गसंस्थायी स्वयम्भूलिङ्गपूजितः।
हव्यो हुतप्रियो होता हुतभुग् हवनप्रियः॥१९०॥
हरलालनसन्तुष्टो हलाहलाशिपुत्रकः।
ह्रींकाररूपो हुंकारो हाहाकारसमाकुलः॥१९१॥
हिमाचलसुतासूनुर्हेमभास्वरदेहकः ।
हिमाचलशिखारूढो हिमधामसमद्युतिः॥१९२॥
क्षोभहन्ता क्षुधाहन्ता क्षैण्यहन्ता क्षमाप्रदः।
क्षमाधारी क्षमायुक्तः क्षपाकरनिभः क्षमी॥१९३॥
ककारादिक्षकारान्तसर्वहल्कप्रपूजितः ।
अकारादिक्षकारान्तवर्णमालाविजृम्भितः ॥१९४॥

अकारादिक्षकारान्तमहासरस्वतीमयः ।
स्थूलतमशरीराढ्यः कारुकर्मविजृम्भितः ॥१९५॥
स्थूलतरस्वरूपाढ्यश्चक्रजालप्रकाशितः ।
स्थूलरूपसमुज्जृम्भी हृदब्जध्यातरूपकः ॥१९६॥
सूक्ष्मरूपसमुल्लासी मन्त्रजालस्वरूपकः ।
सूक्ष्मतरतनुश्रीकः कुण्डलिनीस्वरूपकः ॥१९७॥
सूक्ष्मतमवपुश्शोभी पराकामकलातनुः ।
पररूपसमुद्भासी सच्चिदानन्दविग्रहः ॥१९८॥
परापरवपुर्धारी सप्तरूपबिलासितः ।
षडाम्नायमहामन्त्रनिकुरुम्बनिषेवितः ॥१९९॥
तत्पुरुषमुखोत्पन्नपूर्वाम्नायमनुप्रियः ।
अघोरमुखसञ्जातदक्षिणाम्नायपूजितः ॥२००॥
सद्योजातमुखोत्पन्नपश्चिमाम्नायसेवितः ।
वामदेवमुखोत्पन्नोत्तराम्नायप्रपूजितः ॥२०१॥
ईशानमुखसञ्जातोर्ध्वाम्नायमनुसेवितः ।
विमर्शमुखसञ्जातानुत्तराम्नायपूजितः ॥२०२॥
तोटकाचार्यसन्दिष्टपूर्वाम्नायकमन्त्रकः ।
सुरेशसमुपादिष्टदक्षिणाम्नायमन्त्रकः ॥२०३॥
पद्मपादसमादिष्टपश्चिमाम्नायमन्त्रकः ।
हस्तामलकसन्दिष्टोत्तराम्नायकमन्त्रकः ॥२०४॥
शङ्कराचार्यसन्दिष्टोर्ध्वाम्नायाखिलमन्त्रकः ।
दक्षिणामूर्तिसन्निष्ठानुत्तराम्नायमन्त्रकः ॥२०५॥

सहजानन्दसन्निष्ठसर्वाम्नायप्रकाशकः।
•पूर्वाम्नायकमन्त्रौघैः सृष्टिशक्तिप्रकाशकः॥२०६॥
दक्षिणाम्नायमन्त्रौघैः स्थितिशक्तिप्रकाशकः।
पश्चिमाम्नायमन्त्रौघैर्हृतिशक्तिप्रकाशकः॥२०७॥
उत्तराम्नायमन्त्रौघैस्तिरोधानप्रकाशकः ।
ऊर्ध्वाम्नायकमन्त्रौघैरनुग्रहप्रकाशकः ॥२०८॥
अनुत्तरगमन्त्रौघैः सहजानन्दलासकः।
सर्वाम्नायकसन्निष्ठानुस्यूतचित्सुखात्मकः॥२०९॥
सृष्टिकर्ता ब्रह्मरूपो गोप्ता गोविन्दरूपकः।
संहारकृद्रुद्ररूपस्तिरोधायक ईश्वरः॥२१०॥
सदाशिवोऽनुग्रहीता पञ्चकृत्यपरायणः।
अणिमादिगुणास्पृष्टो निर्गुणानन्दरूपकः॥२११॥
सर्वात्मभावनारूपः सुखमात्रानुभावकः।
स्वस्वरूपसुसंशोभी ताटस्थिकस्वरूपकः॥२१२॥
षड्गुणोऽखिलकल्याणगुणराजिविराजितः।
यज्ञाग्निकुण्डसम्भूतः क्षीरसागरमध्यगः॥२१३॥
त्रिदशकारुनिष्पन्नस्वानन्दभवनस्थितः ।
ऊरीकृतेशपुत्रत्वो नीलवाणीविवाहितः॥२१४॥
नीलसरस्वतीमन्त्रजपतात्पर्यसिद्धिदः ।
विद्यावदसुरध्वंसी सुररक्षासमुद्यतः॥२१५॥
चिन्तामणिक्षेत्रवासी चिन्तिताखिलपूरकः।
महापापौघविध्वंसी देवेन्द्रकृतपूजनः॥२१६॥

तारारम्भी नमोयुक्तो भगवत्पदङेन्तगः।
एकदंष्ट्रायसंयुक्तो हस्तिमुखायसंयुतः॥२१७॥
लम्बोदरचतुर्थ्यन्तविराजितकलेवरः ।
उच्छिष्टपदसंराजी महात्मनेपदप्रियः॥२१८॥
आंक्रोंह्रीङ्गंसमायुक्तो घेघेस्वाहासमापितः।
ताराख्धमहामन्त्रो हस्तिमुखान्तङेयुतः॥२१९॥
लम्बोदरायसंयुक्तो ङेन्तोच्छिष्टमहात्मयुक्।
पाशांकुशत्रपामारो हृल्लेखासमलंकृतः॥२२०॥
वर्मघेघेसमारूढ उच्छिष्टायपदोपधः।
वह्निजायासुसम्पूर्णो मन्त्रराजद्वयान्वितः॥२२२॥
ऊर्ध्वसमाख्य उच्छिष्टो विजयो नृत्यकर्मकः।
विघ्नविध्वंसिविघ्नेशो द्विजपूर्वगणाधिपः॥२२३॥
क्षिप्रेशो वल्लभाजानिर्भक्तीशः सिद्धिनायकः।
द्व्यष्टावतारसम्भिन्नलीलावैविध्यशोभितः ॥२२४॥
द्वात्रिंशदवताराढ्यो द्वात्रिंशद्दीक्षणक्रमः।
शुद्धविद्यासमारब्धमहाषोडशिकान्तिमः ॥२२५॥
महद्द्वयसमायुक्तपादुकासम्प्रतिष्ठितः ।
प्रणवादिस्त्रितारीयुग् बालाबीजकशोभितः॥२२६॥
वाणीभूबीजसंयुक्तो हंसत्रयसमन्वितः।
खेचरीबीजसम्भिन्नो नवनाथसुशोभितः॥२२७॥
प्रासादश्रीसमायुक्तो नवनाथविलोमकः।
पराप्रासादबीजाढ्यो महागणेशमन्त्रकः॥२२८॥

बालाक्रमोत्क्रमप्रीतो योगवालाविजृम्भितः।
अन्नपूर्णासमायुक्तो वाजिवाहाविलासितः॥२२९॥
सौभाग्यपूर्वविद्यायुग् रमादिषोडशीयुतः।
उच्छिष्टपूर्वचाण्डालीसमायुक्तसुविग्रहः ॥२३०॥
त्रयोदशार्णवाग्देवीसमुल्लसितमूर्तिकः।
नकुलीमातृसंयुक्तो महामातङ्गिनीयुतः॥२३१॥
लघुवार्तालिकायुक्तः स्वप्नवार्तालिकान्वितः।
तिरस्कारीसमायुक्तो महावार्तालिकायुतः॥२३२॥
पराबीजसमायुक्तो लोपामुद्राविजृम्भितः।
त्रयोदशाक्षरीहादिज्ञप्तिविद्यासमन्वितः॥२३३॥
महावाक्यमहामातृचतुष्टयविलासितः ।
ब्रह्मण्यरसबीजाढ्यब्रह्मण्यद्वयशोभितः ॥२३४॥
सप्तदशाक्षरीशैवतत्त्वविमर्शिनीयुतः ।
चतुर्विंशतिवर्णात्मदक्षिणामूर्तिशोभितः॥२३५॥
रदनाक्षरसंशोभिगणपोच्छिष्टमन्त्रकः ।
गिरिव्याहृतिवर्णात्मगणपोच्छिष्टराजकः ॥२३६॥
हंसत्रयसमारूढो रसावाणीसमर्पितः।
श्रीविद्यानन्दनाथाढ्य आत्मकपदसंयुतः॥२३७॥
श्रीचर्यानन्दनाथाढ्यः श्रीमहापादुकाश्रितः।
पूजयामिपदप्रीतो नमपदसमापितः॥२३८॥
गुरुमुखैकसंवेद्यो गुरुमण्डलपूजितः।
दीक्षागुरुसमारब्धशिवान्तगुरुसेवितः ॥२३९॥

समाराध्यपदद्वन्द्वो गुरुभिः कुलरूपिभिः।
विद्यावतारगुरुभिः सम्पूजितपदद्वयः॥२४०॥
परौघीयगुरुप्रीतो दिव्यौघगुरुपूजितः।
सिद्धौघदेशिकाराध्यो मानवौघनिषेवितः॥२४१॥
गुरुत्रयसमाराध्यो गुरुषट्कप्रपूजितः।
शाम्भवीक्रमसम्पूज्योऽशीत्युत्तरशतार्चितः॥२४२॥
क्षित्यादिरश्मिसन्निष्ठो लङ्घिताखिलरश्मिकः।
षडन्वयक्रमाराध्यो देशिकान्वयरक्षितः॥२४३॥
सर्वश्रुतिशिरोनिष्ठपादुकाद्वयवैभवः ।
पराकामकलारूपः शिवोहम्भावनात्मकः॥२४४॥
चिच्छक्त्याख्यपराहंयुक् सर्वज्ञानिस्वरूपकः।
संविद्बिन्दुसमाख्यातोऽपराकामकलामयः ॥२४५॥
मायाविशिष्टसर्वेशो महाबिन्दुस्वरूपकः।
अणिमादिगुणोपेतः सर्जनादिक्रियान्वितः॥२४६॥
मायाविशिष्टचैतन्योऽगण्यरूपविलासकः।
मिश्रकामकलारूपोऽग्नीषोमीयस्वरूपकः ॥२४७॥
मिश्रबिन्दुसमाख्याको जीववृन्दसमाश्रितः।
कामकलात्रयाविष्टो बिन्दुत्रयविलासितः॥२४८॥
कामकलात्रयध्यानसर्वबन्धविमोचकः ।
बिन्दुत्रयैकताध्यानविकलेवरमुक्तिदः ॥२४९॥
महायजनसम्प्रीतो वीरचर्याधरप्रियः।
अन्तर्यागक्रमाराध्यो बहिर्यागपुरस्कृतः॥२५०॥

आत्मयागसमाराध्यः सर्वविश्वनियामकः।
मातृकादशकन्यासदेवताभावसिद्धिदः ॥२५१॥
प्रपञ्चयागन्यासेन सर्वेश्वरत्वदायकः।
लघुषोढामहाषोढान्यासद्वयसमर्चितः ॥२५२॥
श्रीचक्रत्रिविधन्यासमहासिद्धिविधायकः ।
रश्मिमालामहान्यासवज्रवर्मस्वरूपकः ॥२५३॥
हंसपरमहंसाख्यन्यासद्वयविभावितः ।
महापदावनीन्यासकलाशताधिकाष्टकः॥२५४॥
त्रिपुरापूजनप्रीतः त्रिपुरापूजकप्रियः।
नवावृत्तिमहायज्ञसंरक्षणधुरन्धरः ॥२५५॥
लम्बोदरमहारूपो भैरवीभैरवात्मकः।
उत्कृष्टशिष्टसद्वस्तु परसंवित्तिरूपकः॥२५६॥
शुभाशुभकरं कर्म जीवयात्राविधायकः।
सच्चित्सुखं नाम रूपमधिष्ठानात्मकः परः॥२५७॥
आरोपितजगज्जातं मिथ्याज्ञानममङ्गलम्।
अकारादिक्षकारान्तः शब्दसृष्टिस्वरूपकः॥२५८॥
परावाग् विमर्शरूपी पश्यन्ती स्फोटरूपधृक्।
मध्यमा चिन्तनारूपो वैखरी स्थूलवाचकः॥२५९॥
ध्वनिरूपो वर्णरूपी सर्वभाषात्मकोऽपरः।
मूलाधारगतः सुप्तः स्वाधिष्ठाने प्रपूजितः॥२६०॥
मणिपूरकमध्यस्थोऽनाहताम्बुजमध्यगः।
विशुद्धिपङ्कजोल्लास आज्ञाचक्राब्जवासकः॥२६१॥

सहस्राराम्बुजारूढः शिवशक्त्यैक्यरूपकः।
मूलकुण्डलिनीरूपो महाकुण्डलिनीमयः॥२६२॥
षोडशान्तमहास्थानोऽस्पर्शाभिधमहास्थितिः।

॥ इति सहस्रनामकं सम्पूर्णम्॥

उड्डामरेशतन्त्रेऽस्मिन् पटले क्षिप्रसाधने॥२६३॥
उच्छिष्टाख्यगणेशस्य क्षिप्रसिद्धिविधायकः।
गुह्यनामसहस्राख्यो नामभागः समाप्यते॥२६४॥

फलश्रुतिः

इदं तु नामसहस्रेषुमुच्छिष्टगणपस्य तु।
सर्वनामसहस्रेषु क्षिप्रसिद्धिविधायकम्॥१॥
गुप्तानामपि संगुप्तं सर्वशक्तिसमर्पकम्।
मासेनैकैन सर्वासां सिद्धीनां हि विधायकम्॥२॥
अनेन सदृशं स्तोत्रमन्यद्भुवि न विद्यते।
विना त्रिपुरसुन्दर्या गुप्तनामसहस्रकम्॥३॥
यद्यत्फलं समुद्दिष्टं गुप्तनामसहस्रके।
तत्तत् सर्वमतिक्षिप्रं सिद्ध्यत्यत्र न संशयः॥४॥
शरीरद्वयसम्बद्धसर्वरोगविनाशम् ।
अनाद्यविद्याविध्वंसि ब्रह्मविद्याप्रकाशकम्॥५॥
शरीरे वर्तमानेऽपि विकलेवरमुक्तिभाक्।
साधको जायतेऽनेन गुह्यनामजपेन तु॥६॥
सच्चिदानन्दरूपेण वर्तमानो हि साधकः।
नामरूपस्य साकल्यमुच्छिष्टत्वेन पश्यति॥७॥

सिद्धस्य धीरवर्यस्य करणत्रयचेष्टितम्।
उपासनारूपमेव संविभाति न संशयः॥८॥
जीवन्नेव हि मुक्तः स उच्छिष्टस्य गणेशितुः।
विदधानः सपर्यां तु सर्वदैव हि दृश्यते॥९॥
तावत्पूजां साधकोद्ध उच्छिष्टस्य महाप्रभोः।
क्रियाकलापजटिलां जपहोमादिनिर्भराम्॥१०॥
पञ्चावरणचक्रीयां कुर्यात् संस्थिरमानसः।
यावत्सर्वं निजं कर्म संशान्तकर्तृतादिकम्॥११॥
मरीचिकाजलप्रायमुच्छिष्टपदमाप्नुयात् ।
नामरूपस्य साकल्यमुच्छिष्टपदमाप्नुयात्॥१२॥
नामरूपात्मिका निष्ठा येषां तेषामियं स्तुतिः।
कलौ हि पापबहुले सर्वपापप्रणाशिका॥१३॥
इदं हि स्तोत्रग्रन्थानां सर्वेषां नायकायते।
वैदिकैस्तान्त्रिकैर्वापि जपयज्ञादिभिस्तदा॥१४॥
यद्यत्पुण्यं कृच्छ्रासाध्यमश्वमेधादिभिस्तथा।
तत्तत्सर्वमतिक्षिप्रं लघूपायेन साध्यते॥१५॥
अश्वमेधस्य कोटीनां यत्पुण्यं श्रुतिसम्मतम्।
तदत्र गुह्यसाहस्रपठनेन हि सिद्ध्यति॥१६॥
सङ्क्लृप्तनामसाहस्रपठनाद्या हि साध्यते।
सा शक्तिरश्वमेधस्याष्टकोट्यापि न सिद्धयति॥१७॥
इदं नामसहस्रं तु सर्वविद्याप्रकाशकम्।
अष्टावधानविद्यायां शतावधानकेऽपि च॥१८॥

साहस्त्रिकावधानेऽपि सर्वविद्यास्वयंग्रहे।
एतादृशं स्तोत्रमन्यन् नोपकारि न संशयः॥१९॥
प्रतिवादिमुखस्तम्भे गणेशस्य महाप्रभोः।
उच्छिष्टस्य स्तोत्रमेतद्विस्मापकफलप्रदम्॥२०॥
मनुष्यतारूपिताद्धि प्रमादादिकलङ्कितात्।
गुरोः सम्पाद्यते विद्या या सा विद्याधिदेवता॥२१॥
स्वयंग्रहाश्लेषमार्गमनुरुन्धे हि साधके।
अनुभवैकगम्यं तु गुह्यनामप्रसादनम्॥२२॥
इदं नामसहस्त्रं तु सर्वसम्पत्प्रदायकम्।
धनधान्यसुताद्यष्टलक्ष्मीवृन्दप्रवर्धकम् ॥२३॥
सर्ववन्ध्यात्वदोषघ्नं सत्सन्तानप्रदायकम्।
सर्वज्वरार्तिशमनं दीर्घायुष्यप्रदायकम्॥२४॥
धर्ममर्थं काममोक्षौ झटितीद प्रदास्यति।
निष्कामो वा सकामो वा सर्व एतत्प्रसाधयेत्॥२५॥
द्वात्रिंशद्वर्णकं मन्त्रं सहस्त्रावृत्तिकं जपेत्।
गुह्यनामसहस्त्राख्यमेतद् भक्त्या ततः पठेत्॥२६॥
एवं तु साधकश्रेष्ठो वर्षमात्रं प्रयत्नतः।
निशीथिन्यां मुक्तकेशः प्रजपेत्स्थिरमानसः॥२७॥
अष्टसिद्धिमवाप्नोति खेचरीमेलको भवेत्।
समस्तेष्वपि लोकेषु तस्यासाध्यं न विद्यते॥२८॥
द्वात्रिंशद्वर्णकं मन्त्रं मातृकासम्पुटीकृतम्।
मासमेकं प्रतिदिनमष्टोत्तरशतं जपेत्॥२९॥

ततस्तु नामसाहस्रं प्रत्यहं भक्तितः पठेत्।
सिद्धिसङ्घाः समायान्ति सद्यः साधकतल्लजम्॥३०॥
पुस्तके लिखितं मन्त्रं दृष्ट्वा जपति यो नरः।
स साधकाधमभ्रष्टो योगिनीशापभाग्भवेत्॥३१॥
आचार्योद्धात्सिद्धमन्त्रान्मनुं लब्ध्वा विधानतः।
साधकोद्धः सद्य एव सिद्धमन्त्रो भविष्यति॥३२॥
मन्त्राराधनकालेऽपि साहस्रपठनेऽपि च।
पत्नीयोन्यं न्यस्तलिङ्गो ध्यातव्येऽत्र गणाधिपः॥३३॥
शुण्डाहस्तेन जायाया संलालितोरुजद्वयः।
तारठद्वयगंबीजैर्बीजशक्ती च कीलकम्॥३४॥
ताम्बूलचर्वणायुक्तः पत्न्यालिङ्गितदेहकः।
मुक्तकेशो विवस्त्रश्च कुर्यादाराधनं परम्॥३५॥
जननाशौचयुक्तो वा मरणाशौचयुक् तथा।
जपं कुर्वन्हि धीरोऽयं सद्यः सिद्धिं प्रपश्यति॥३६॥
रजस्वलायाः कन्यायाः समीपे जपतत्परः।
योगिनीनां चतुःषष्टिकोटिं दासीकरोति हि॥३७॥
पितृभूमौ निशीथिन्यां प्रत्यहं धैर्यसंयुतः।
मातृकापुटितं मन्त्रमष्टोत्तरशतं जपेत्॥३८॥
साधकतल्लजस्यास्य यावन्मासं समाप्यते।
निश्चितं मन्त्रसिद्धिः स्यादित्युक्तं तन्त्रवेदिभिः॥३९॥
गुरुं सन्तोषयेद् भक्त्या भूषणाच्छादनादिभिः।
गुरोः सन्तोषमात्रेण मन्त्रसिद्धिर्भवेद् ध्रुवम्॥४०॥

गुरुमूलमिदं सर्वमित्याहुस्तन्त्रवेदिनः।
गुरुं विलङ्घ्य मन्त्रेऽस्मिन् नाधिकारः सुरेष्वपि॥४१॥
एतस्य मन्त्रराजस्य प्रयोगः क्रियते यदि।
गुर्वनुज्ञां विना तस्य नाशः सद्यः प्रजायते॥४२॥
शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन।
यस्य देवे च मन्त्रे च गुरौ च त्रिषु निश्चला॥४३॥
न व्यवच्छिद्यते भक्तिः तस्य सिद्धिरदूरतः।
गुरोस्तु पादुकामन्त्रं स्मृत्वा शिरसि पङ्कजे॥४४॥
महतीं पादुकामेवाथवा स्वशिरसि स्मरन्।
सर्वमन्त्रेषु संसिद्धिमनायासेन गच्छति॥४५॥
गुरुपादुस्मृतिं हित्वा संसिसाधयिपोरणुम्।
कोट्यावृत्तिजपेनापि तस्य मन्त्रो न सिद्ध्यति॥४६॥
यस्य कस्यापि मन्त्रस्यालंघ्योऽयं हि विधिः स्मृतः।
उच्छिष्टस्य गणेशस्य जागर्त्येष विशेषतः॥४७॥
महती पादुकैषा हि सर्वविद्यौघविग्रहा।
आदिनाथस्य तद्विद्या शब्दरूपं वपुर्मता॥४८॥
तेनास्याः स्मरणात्सद्यः सर्वमन्त्रो हि सिद्ध्यति।
ब्राह्मे मुहूर्त उत्थाय साधकः स्थिरमानसः॥४९॥
प्रत्यहं दक्षिणामूर्तेर्महतीं पादुकां सुधीः।
अष्टाविंशतिवारं तु स्मृत्वा यं कञ्च साधयेत्॥५०॥
यद्यपि ब्राह्मणश्रेष्ठः कुलद्रव्यपरायणः।
तदानेन विधानेन कर्तव्यं वीरसाधनम्॥५१॥

मद्यं मांसं च मत्स्यं च मुद्रां मैथुनमेव च।
इति मपञ्चकं दत्त्वा राधयेच्च गणाधिपम्॥५२॥
एतेषां नित्यता ज्ञेया ह्युच्छिष्टस्य प्रपूजने।
प्रतिनिध्यर्पणं त्वत्र न हि देवप्रसादकम्॥५३॥
तथापीह कलौ केचिद् ग्रह्णीयुर्लशुनादिकम्।
सम्प्रदायानुरोधेनानुतिष्ठतु हि साधकः॥५४॥
लक्षमानं जपेन्मन्त्रं दशांशं जुहुयाद्घृतैः।
तर्पणानि दशांशेन कुर्यान्मार्जनभोजने॥५५॥
कलौ हि सर्वमन्त्राणां चतुर्गुणजपो भवेत्।
एवं संसिद्धमन्त्रस्तु प्रयोगानाचरेत्ततः॥५६॥
धनं धान्यं सुतान् पौत्रान् सौभाग्यमतुलं यशः।
प्राप्नोति साधकश्रेष्ठो गणेशस्य प्रसादतः॥५७॥
ललितानामसाहस्रमुच्छिष्टगणपस्य च।
स्तोत्रद्वयं साधकानां सर्ववाञ्छाप्रपूरणम्॥५८॥
द्वयोरप्यनयोर्मध्ये नान्तरं किञ्चिदस्ति हि।
स्तोत्रयोरनयोर्यस्तु भेदकृत् पापकृद्धि सः॥५९॥
उच्छिष्टगणनाथस्य मन्त्रेष्वेषु न शोधनम्।
सिद्धारिचक्रचिन्ता न प्राप्ताश्चेत्सिद्धिदा गुरोः॥६०॥
मनवोऽमी सदा गोप्या न प्रकाश्या इतस्ततः।
द्वात्रिंशदर्णके मन्त्रे विशिष्टोऽयं विधिः स्मृतः॥६१॥
अयमेव विधिर्ग्राह्यो देवीषोडशवर्णके।
राज्यं देयं शिरो देयं न प्रदेयमिदं द्वयम्॥६२॥

महद्द्वयसमायुक्तपादुका भुवि दुर्लभा।
इयं द्वयात्सुसंगुप्ता न देया यस्य कस्य तु॥६३॥
प्रणवादिस्त्रितारीयुग् बालाबीजकशोभिता।
वाणीभूबीजसंयुक्ता हंसत्रयसमन्विता॥६४॥
खेचरीबीजसम्भिन्ना नवनाथसुशोभिनी।
प्रासादश्रीसमायुक्ता नवनाथविलोमका॥६५॥
पराप्रासादबीजाढ्या महागणेशमन्त्रका।
बालाषडक्षरीयुक्ता योगबालाविजृम्भिता॥६६॥
अन्नपूर्णासमायुक्ता वाजिवाहाविलासिनी।
सौभाग्यपूर्वविद्यायुङ्महाषोडशिकान्विता ॥६७॥
उच्छिष्टपूर्वचाण्डालीसमायुक्तसुविग्रहा ।
त्रयोदशार्णवाग्देवीसमुल्लसितमूर्तिका ॥६८॥
नकुलीमातृसंयुक्ता महामातङ्गिनीयुता।
लघुवार्तालिकायुक्ता स्वप्नवार्तालिकान्विता॥६९॥
तिरस्करिणिकायुक्ता महावार्तालिकायुता।
पराबीजसमायुक्ता लोपामुद्राविजृम्भिता॥७०॥
त्रयोदशाक्षरीहादिज्ञप्तिविद्यासमन्विता ।
द्विजपंक्त्यर्णसंयुक्तोच्छिष्टगणपसंयुता ॥७१॥
महावाक्यमहामातृचतुष्टयविलासिनी ।
चतुर्विंशतिवर्णात्मदक्षिणामूर्तिशोभिनी ॥७२॥
पुनर्हंसत्रयारूढा रसावाणीसमापिता।
श्रीविद्यानन्दनाथेति तत आत्मक उच्चरेत्॥७३॥

श्रीचर्यानन्दनाथेति ततश्च श्रीमहापदम्।
पादुकां तु समुच्चार्य पूजयामि पदं ततः॥७४॥
नम इति समुच्चार्य महतीं पादुकां स्मरेत्।
महती पादुकेयं तु सर्वतन्त्रेषु गोपिता॥७५॥
प्रातः सायं च संचिन्त्या महासिद्धिप्रदायिनी।
पादुकायाः परो मन्त्रः त्रैलोक्येऽपि न विद्यते॥७६॥
महतीं पादुकां स्मृत्वोच्छिष्टाख्यस्य गणेशितुः।
मन्त्रराजस्य संसिद्ध्यै प्रयतेतेह साधकः॥७७॥
उच्छिष्टस्य गणेशस्य संराधनावलम्बने।
साधकैर्धैर्यवत्त्वेन वर्तितव्यं प्रत्यत्नतः॥७८॥
तादृश्यां धैर्यसम्पत्तौ असाध्यं नहि विद्यते।
प्रमाणं मेरुतन्त्रीयं विस्मर्तव्यमिदं न तु॥७९॥
रमादिषोडशीदीक्षा सम्पूर्णाख्या गुरूत्तमात्।
लब्धा येन हि तस्यैवोच्छिष्टोपास्तौ हि योग्यता॥८०॥
षोडशीसाधकादन्य उच्छिष्टाख्यं गणेश्वरम्।
शास्त्रमेनमनादृत्य सिसाधयिपुरुद्यतः॥८१॥
कुलस्य पशुपुत्राणामात्मनश्च धनस्य च।
नाशमेव प्रपश्यन्हि गच्छेच्च रौरवादिकम्॥८२॥
देशिकापसन्दान्मन्त्र उच्छिष्टस्य गणेशितुः।
गृह्यमाणो हि चापल्याद् हन्ति शिष्यं गुरुं तथा॥८३॥
नियमोल्लङ्घिनं शिष्यं योगिनीनां क्रुधा दहेत्।
अयुक्तस्य हि शिष्यस्योपदेष्टारं दहेत्तथा॥८४॥

उच्छिष्टसाधनात्पूर्वमष्टाविंशतिवर्णकम् ।
महागणाधिनाथस्य मन्त्रराजमनुत्तमम्॥८५॥
साधयेत्साधको धृत्या ह्यन्यथाऽनर्थमाचरेत्।
अनन्तरं हि बालाया मन्त्रं संसाध्य साधकः॥८६॥
सौभाग्यपूर्वविद्यायां सिद्धिं गच्छेद्धि यत्नतः।
द्वितीयमभिषेकं च ततो लब्ध्वा गुरूत्तमात्॥८७॥
पूर्णाभिषेकनामानं संसाधयेच्च षोडशीम्।
तारादिषोडशीभेदाः सन्ति यद्यपि वत्सक॥८८॥
श्रीबीजेन समारब्धा षोडशीह तु गृह्यते।
त्रिपुरां षोडशीं नाम साधयित्वा ह्युपासकः॥८९॥
उच्छिष्टाख्यं गणेशानं ततो धृत्या हि साधयेत्।
द्वात्रिंशदर्णके मन्त्रेऽथ सप्ताधिकवर्णके॥९०॥
साधकस्येह संसिद्धिरनायासेन दृश्यते।
अत इमं स्तोत्रराजं सङ्गोपाय प्रयत्नतः॥९१॥
अष्टोत्तरं सहस्रं तु स्तोत्रस्यास्य हि सेवनम्।
चतुर्दशकसंयुक्तचतुर्युक्तचतुश्शती ॥९२॥
साहस्री मनुराजस्य सञ्जप्तिरपि साधकम्।
सर्वज्ञत्वादिसिद्ध्यौघं सिद्धीश्चाणिमादिकाः।
सङ्गमयेद्धि तत्रैव जगद्विस्मयकारिणीः॥९३॥
दक्षिणाभिमुखेशस्य सकाशाद्धि कुमारकः।
स्तोत्रस्यैतस्य संश्रुत्या सद्योऽजायत निर्वृतः॥९४॥

उड्डामरेशतन्त्रेऽस्मिन् पटले क्षिप्रसाधने।
गुह्यनामकसाहस्रे फलभागः समाप्यते॥९५॥
उड्डामरेशतन्त्रेऽस्मिन् पटले क्षिप्रसाधने।
गुह्यनामसहस्राख्यस्त्रिंशोऽध्यायः समाप्यते॥९६॥
''चतुर्दशकसंयुक्तचतुर्युक्तचतुश्शती ।
आनुष्टुभानां संख्यास्मिन्नध्याये परिगण्यते॥''
इत्येष श्लोकः अधिकतया साम्प्रदायिपाठे अनुसन्धीयते

॥ इति सर्वं शिवम्॥

॥ श्रीः ॥

उच्छिष्टगणेशसहस्त्रनामावलिः

(सर्वत्रादौ ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं इति अष्टतारीसंयोजनम्। महागणेशानोपासकैः ओं श्रीं ह्रीं क्लीं ग्लौं गं इति षट्तारीसंयोजनं कर्तव्यम्। सप्तत्रिंशदक्षर-श्रीमदुच्छिष्टगणेशानोपासकैः ओं आं क्रों ह्रीं गं ग्लौं इति षट्तारीसंयोजनं कर्तव्यम्।। सर्वत्र नमोन्तप्रतिनामान्ते प्रणवपल्लवितत्वमपि।।)

१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं महागणाधिनाथाख्याय नमः ओं

२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं अष्टाविंशत्यक्षरात्मकाय नमः ओं

३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं तारश्रीशक्तिकन्दर्पभू-स्मृतिबिन्दुसंयुताय नमः ओं

४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ङेन्तगणपतिप्रोक्ताय नमः ओं

५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वरवरदसंयुताय नमः ओं

६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं सर्वजनद्वितीयान्ताय नमः ओं

७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं आदित्यशिवसंयुताय नमः ओं
८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वशमानयसंयुक्ताय नमः ओं
९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वह्निजायासमर्पिताय नमः ओं
१०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं गणकमुनिसंदृष्टाय नमः ओं
११. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं निचृद्गायत्रभाषिताय नमः ओं
१२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं सुरादिवन्द्यपादाब्जाय नमः ओं
१३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मनुराजविजृम्भिताय नमः ओं
१४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं इक्षुसागरमध्यस्थाय नमः ओं
१५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं रत्नद्वीपस्य मध्यगाय नमः ओं
१६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं तरङ्गमालिकाधौत-शीततरामलालयाय नमः ओं
१७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कल्पपादपसंशोभि-मणिभूमिविराजिताय नमः ओं
१८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मृदुवातसमानीतदिव्यगन्ध-निषेविताय नमः ओं
१९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं नानाकुसुमसंकीर्णाय नमः ओं
२०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पक्षिवृन्दरवप्रियाय नमः ओं
२१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं युगपदृतुषट्केनसंसेवितपदद्वयाय नमः ओं
२२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं नवरत्नसमा-विद्धसिंहासनसमास्थिताय नमः ओं

२३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं जपापुष्पतिरस्कारि-
रक्तकान्तिसमुज्ज्वलाय नमः ओं
२४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वल्लभाश्लिष्टवामाङ्गाय
नमः ओं
२५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं एकादशकरान्विताय नमः ओं
२६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं रत्नकुम्भाढ्यशुण्डाग्राय
नमः ओं
२७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं बीजापूरिणे नमः ओं
२८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं गदाधराय नमः ओं
२९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं इक्षुचापधराय नमः ओं
३०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं शूलिने नमः ओं
३१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं चक्रपाणये नमः ओं
३२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं सरोजभृते नमः ओं
३३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पाशिने नमः ओं
३४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं धृतोत्पलाय नमः ओं
३५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं शालीमञ्जरीभृते नमः ओं
३६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं स्वदन्तभृते नमः ओं
३७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पञ्चावरणचक्रेशाय नमः ओं
३८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं षडाम्नायप्रपूजिताय नमः ओं
३९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मूलमन्त्राढ्यपूजाकाय नमः ओं
४०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं षडङ्गपरिवारिताय नमः ओं
४१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं परौघपूजनातुष्टाय नमः ओं

४२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं दिव्यौघादिनिषेविताय नमः ओं
४३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं श्रीश्रीपतिसन्तुष्टाय नमः ओं
४४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं गिरिजातत्पतिप्रियाय नमः ओं
४५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं रतिमन्मथसम्प्रीताय नमः ओं
४६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं महीवराहपूजिताय नमः ओं
४७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ऋद्ध्यामोदप्रपूजकाय नमः ओं
४८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं समृद्धितत्पतिप्रियाय नमः ओं
४९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कान्तिसुमुखसुप्रीताय नमः ओं
५०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मदनावतिदुर्मुखाय नमः ओं
५१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मदद्रवाविघ्नपूज्याय नमः ओं
५२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं द्राविणीविघ्नकर्तृकाय नमः ओं
५३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वसुधाराशङ्खपूज्याय नमः ओं
५४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वसुमतिकपद्मकाय नमः ओं
५५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ब्राह्मीप्रियाय नमः ओं
५६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ईश्वरीशाय नमः ओं
५७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कौमारीसेवितांघ्रिकाय नमः ओं
५८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वैष्णव्यर्चितपदद्वन्द्वाय नमः ओं
५९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वाराहीसेवितांघ्रिकाय नमः ओं
६०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं इन्द्राणीपूजितश्रीकाय नमः ओं
६१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं चामुण्डाश्रितपादुकाय नमः ओं

६२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं महालक्ष्मीमहामातृसम्पूजितपदद्वयाय नमः ओं

६३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ऐरावतसमारूढवज्रहस्तेन्द्रपूजिताय नमः ओं

६४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं अजोपरिसमारूढशक्तिहस्ताग्निसेविताय नमः ओं

६५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं महिषारूढदण्डाढ्ययमदेवप्रपूजिताय नमः ओं

६६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं नरारोहिखड्गहस्तनिर्ऋत्याश्रितपादुकाय नमः ओं

६७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मकरवाहनारूढपाशाढ्यवरुणार्चिताय नमः ओं

६८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं रुरोरुपरिसन्तिष्ठद्ध्वजाढ्यश्वसनार्चिताय नमः ओं

६९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं अश्ववाहनशङ्खाढ्यसोमदेवप्रपूजिताय नमः ओं

७०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वृषभवाहनारूढत्रिशूलाढ्येशसेविताय नमः ओं

७१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पञ्चावरणपूजोद्यत्कारुण्याकुलमानसाय नमः ओं

७२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पञ्चावृतिनमस्याकभक्तवाञ्छाप्रपूरणाय नमः ओं

७३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं एकमूर्तये नमः ओं
७४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं अष्टमूर्तये नमः ओं
७५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पञ्चाशन्मूर्तिभेदकाय नमः ओं
७६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ब्रह्मचारिसमाख्याकाय नमः ओं
७७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पत्नीसंयुतमूर्तिकाय नमः ओं
७८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं नग्नपत्नीसमाश्लिष्टाय नमः ओं
७९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं सुरतानन्दतुन्दिलाय नमः ओं
८०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं सुमवाणेक्षुकोदण्डपाशांकुशवरायुधाय नमः ओं
८१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कामिनीचुम्बनायुक्तसदालिङ्गनतत्पराय नमः ओं
८२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं अण्डकर्णकपोलाख्यत्रिस्थानमदवारिराजे नमः ओं
८३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मदापोलुब्धमधुपैर्विचुम्बितकपोलकाय नमः ओं
८४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कामुकाय नमः ओं
८५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कामिनीकान्ताय नमः ओं
८६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कान्ताधरमधुव्रताय नमः ओं
८७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कामिनीहृदयाकर्षिणे नमः ओं
८८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वशागणनिषेविताय नमः ओं
८९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ऐरावतादिदिङ्नागमिथुनाष्टकपूजिताय नमः ओं

९०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं सदा जायाश्रिताय नमः ओं
९१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं अश्रान्ताय नमः ओं
९२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं नग्नोपासकपूजिताय नमः ओं
९३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मांसाशिने नमः ओं
९४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वारुणीमत्ताय नमः ओं
९५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मत्स्यभुजे नमः ओं
९६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मैथुनप्रियाय नमः ओं
९७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मुद्रासप्तकसम्प्रीताय नमः ओं
९८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मपञ्चकनिषेविताय नमः ओं
९९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पञ्चाङ्गरागसुप्रीताय नमः ओं
१००. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं शृङ्गाररसलम्पटाय नमः ओं
१०१. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कर्पूरवीटी-सौगन्ध्यकल्लोलितककुप्तटाय नमः ओं
१०२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उपासकवरिष्ठास्यवीट्या मौक्यनिरासकाय नमः ओं
१०३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं योन्याहितसुशुण्डाकाय नमः ओं

१०४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं योनिलालनलालसाय नमः ओं

१०५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं भगामोदसमाश्वासिने नमः ओं

१०६. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं भगचुम्बनलम्पटाय नमः ओं

१०७. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कान्ताकुच-समालिङ्गिशुण्डामण्डितविग्रहाय नमः ओं

१०८. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टाख्यगणेशानाय नमः ओं

१०९. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टास्वादिसिद्धिदाय नमः ओं

११०. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टपूजनरताय नमः ओं

१११. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टजपसिद्धिदाय नमः ओं

११२. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टहोमसम्प्रीताय नमः ओं

११३. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टव्रतधारकाय नमः ओं

११४. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टतर्पणप्रीताय नमः ओं

११५. ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टमार्जने रताय नमः ओं

ओं श्रीं ह्रीं क्लीं ग्लौं गं वं मकरवाहनश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं यं रुरुवाहनश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं सं अश्ववाहनश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं हं वृषभवाहनश्रीपादुकां०

चतुरस्रस्य द्वितीयवीथ्यां प्रागाद्यासु अष्टसु दिक्षु क्रमेण–

ओं श्रीं ह्रीं क्लीं ग्लौं गं लं वज्रायुधश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं रं शक्त्यायुधश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं टं दण्डायुधश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं क्षं खड्गायुधश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं वं पाशायुधश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं यं ध्वजायुधश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं सं शङ्खायुधश्रीपादुकां०
ओं श्रीं ह्रीं क्लीं ग्लौं गं हं त्रिशूलायुधश्रीपादुकां०

चतुरस्रस्य तृतीयवीथ्यां प्रागाद्यासु अष्टसु दिक्षु क्रमेण–

ओं श्रीं ह्रीं क्लीं ग्लौं गं लं सपरिवारतेजोऽधिपति-वासवश्रीपादुकां०

ओं श्रीं ह्रीं क्लीं ग्लौं गं रं सपरिवारतेजोऽधिपति-वैश्वानरश्रीपादुकां०

ओं श्रीं ह्रीं क्लीं ग्लौं गं टं सपरिवारप्रेताधिपतिधर्मराज-श्रीपादुकां०

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्षं सपरिवाररक्षोऽधिपति-निर्ऋतिश्रीपादुकां०

ओं श्रीं ह्रीं क्लीं ग्लौं गं वं सपरिवारजलाधिपति-
वरुणश्रीपादुकां०

ओं श्रीं ह्रीं क्लीं ग्लौं गं यं सपरिवारप्राणाधिपति-
श्वसनश्रीपादुकां०

ओं श्रीं ह्रीं क्लीं ग्लौं गं सं सपरिवारनक्षत्राधिपति-
सोमश्रीपादुकां०

ओं श्रीं ह्रीं क्लीं ग्लौं गं हं सपरिवारविद्याधिपति-
भूतेशश्रीपादुकां०

ओं श्रीं ह्रीं क्लीं ग्लौं गं पञ्चावरणदेवताभ्यो नमः गन्धं कल्पयामि नमः, पुष्पं कल्पयामि नमः, धूपं कल्पयामि नमः, दीपं कल्पयामि नमः, नैवेद्यं कल्पयामि नमः, कर्पूरवीटिकां कल्पयामि नमः, कर्पूरनीराजनं कल्पयामि नमः॥

ओं श्रीं ह्रीं क्लीं ग्लौं गं अभीष्टं सिद्धिं मे देहि शरणागत-
वत्सल। भक्त्या समर्पये तुभ्यं पञ्चावरणपूजनम्॥

इति सामान्यार्घ्योदकेन पूजासमर्पणं कुर्यात्।

ओं श्रीं ह्रीं क्लीं ग्लौं गं (मूलं) साङ्गाय सपरिवाराय श्रीमहागणपतये नमः। इति योनिमुद्रया प्रणमेत्॥

॥ श्रीः ॥

॥ उच्छिष्टगणपतिपञ्चावरणपूजा ॥

प्राणप्रतिष्ठानन्तरं नवगणेशपीठशक्तीः धर्माद्यष्टकं च महागणपतिवरिवस्यायामिव पूजयित्वा,

ततो ध्यानश्लोकोक्तरीत्या ध्यातमुच्छिष्टगणपतिं भक्तानुग्रहाय तेजोरूपेण परिणतं, स्वहृदयकमलात् ब्रह्मरन्ध्रं प्रापय्य, वहन्नासापुटेन निर्गमय्य, त्रिखण्डामुद्रामण्डितशिखण्डे कुसुमगर्भितेऽञ्जलौ समानीय,

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं शरान्धनुः पाशसृणी स्वहस्तैः दधानमारक्तसरोरुहस्थम्। विवस्त्रपत्न्यां सुरतप्रवृत्तमुच्छिष्टमम्बासुतमाश्रयेऽहम्॥ उच्छिष्टमहागणपतिमावाहयामि इति षडस्त्रमध्यस्थाने आवाह्य,

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं आवाहितो भव'' इत्यादिक्रमेण तत्तन्मुद्राप्रदर्शनपूर्वकं आवाहन-संस्थापन-सन्निधापन-सन्निरोधन-सम्मुखीकरण-अवगुण्ठनानि कृत्वा, वन्दनधेनुयोनिमुद्राश्च प्रदर्शयेत्। अथ हृदयादिषडङ्गमुद्राश्च प्रदर्शयेत्॥

उच्छिष्टगणपतितर्पणम्

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टमहागणपति-श्रीपादुकां पूजयामि तर्पयामि नमः॥ इति दशवारं देवं सन्तर्पयेत्॥

षडङ्गपूजा

षट्कोणेषु षडङ्गदेवीस्तर्पयेत्—

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ओं हस्तिमुखाय हृदयाय नमः। हृदयशक्तिश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं लम्बोदराय शिरसे स्वाहा। शिरश्शक्तिश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टमहात्मने शिखायै वषट्। शिखाशक्तिश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं आंक्रोंह्रींक्लींह्रींहुंघेघे कवचाय हुम्। कवचशक्तिश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टाय नेत्रत्रयाय वौषट्। नेत्रशक्तिश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं स्वाहा अस्त्राय फट्। अस्त्रशक्तिश्रीपादुकां०

गुर्वोघत्रयपूजा महागणपतिवरिवस्यायामिव सन्द्रष्टव्या॥

सर्वत्र अष्टतारीसंयोजनं तु अत्र विशेषः॥

अथ प्रथमावरणपूजा

(षट्कोणमध्ये)

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं उच्छिष्टमहागणपतिश्रीपादुकां (त्रिः)

षट्कोणेषु षडङ्गदेवताः पूर्ववत् सन्तर्पयेत्।।

द्वितीयावरणम्

षट्कोणेषु षडङ्गदेवताः पूर्ववत् सन्तर्पयेत्।।

तृतीयावरणम्

आद्याष्टदलमूलेषु प्रागाद्यासु अष्टसु दिक्षु क्रमेण–

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं श्रीं विद्याश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं श्रीं विश्वधात्री श्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ह्रीं भोगदाश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ह्रीं विघ्ननाशिनीश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं क्लीं निधिप्रदाश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं क्लीं पापघ्नीश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ग्लौं पुण्याश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ग्लौं शशिप्रभाश्रीपादुकां०

आद्याष्टदलकमलदलेषु प्राच्यादिषु दिक्षु क्रमेण–

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं अं अणिमासिद्धिश्रीपादुकां०

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं मं महिमासिद्धिश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं लं लघिमासिद्धिश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं गं गरिमासिद्धिश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं ईं ईशित्वसिद्धिश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं वं वशित्वसिद्धिश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पं प्राकाम्यसिद्धिश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पं प्राप्तिसिद्धिश्रीपादुकां०

तुरीयावरणम्

द्वितीयाष्टदलाब्जस्य दलेषु क्रमशः प्राच्यादिदिक्षु–

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं अं वक्रतुण्डश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं कं एकदंष्ट्रश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं चं महोदरश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं टं गजाननश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं तं लम्बोदरश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पं० विकटश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं यं विघ्नराजश्रीपादुकां०
ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं शं धूम्रवर्णकश्रीपादुकां०

द्वितीयाष्टदलाब्जस्य दलाग्रेषु प्राच्यादिक्रमेण—महागणपतिपूजायामिव ब्राह्म्यादिमात्रष्टकं पूजनीयम्। अत्र अष्टतारीसंयोजनं विशेषः॥

पञ्चमावरणम्

पञ्चमावरणवीथीत्रयेऽपि महागणपतिसपर्यायामिव सवाहन-सायुध-देवेन्द्रादिनमस्या कर्तव्या। अत्रापि अष्टतारी-संयोजनं विशेषः॥

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं पञ्चावरणदेवताभ्यो नमः इत्यादि गन्धादि-कर्पूर-नीराजनान्तोपचारजालमत्र महागणपतिपूजायामिव॥ पूजा-समर्पणमपि अष्टतारीसंयोजनेन॥

ओं आं क्रों ह्रीं क्लीं ह्रीं ग्लौं गं (मूलं) साङ्गाय सपरिवाराय श्रीमदुच्छिष्टमहागण-पतये नमः॥ इति योनिमुद्रया प्रणामः॥

॥ श्रीः ॥

॥ मन्त्रजालप्रकरणम् ॥

गुह्यनामसहस्रके तत्र तत्र उद्धृताः, नाममात्रेण निर्दिष्टाश्च मन्त्राः अस्मिन् भागे नामसहस्रीयतत्तत्स्थलप्रदर्शनपूर्वं क्रोडीक्रियन्ते॥

१. ११ : ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा॥ महागणपतिः॥

२. २४१: हस्तिपिशाचि लिखे स्वाहा॥ उच्छिष्टगणपतिः॥

३. २४२: ओं हस्तिपिशाचि लिखे स्वाहा॥ उच्छिष्टगणपतिः॥

४. २४३: ओं क्रीं क्रीं ह्रीं ह्रीं हुं घे घे फट् स्वाहा॥ उच्छिष्टगणपतिः॥

५. २४४: एकदंष्ट्राय हस्तिमुखलम्बोदराय उच्छिष्टात्मने क्रों ग्लूं ह्रीं हुं घे घे स्वाहा॥ उच्छिष्टगणपतिः॥

६. २४५: ओं नमो भगवते एकदंष्ट्राय हस्ति-

मुखलम्बोदराय उच्छिष्टमहात्मने क्रों ग्लूं ह्रीं हुं घे घे स्वाहा।। उच्छिष्टगणपतिः।।

७. २४६: ओं गं हं क्लौं ग्लौं उच्छिष्टगणेशाय महायक्षायायं बलिः।। उच्छिष्टगणपतिः।।

८. २४७: ओं ह्रीं गं हस्तिपिशाचि लिखे स्वाहा।। उच्छिष्टगणपतिः।।

९. २४८: ओं नमः उच्छिष्टगणेशाय हस्तिपिशाचि लिखे स्वाहा।। उच्छिष्टगणपतिः।।

१०. २४९: ओं नमो भगवते एकदंष्ट्राय हस्तिमुखाय

८२१-३० लम्बोदराय उच्छिष्टमहात्मने आं क्रों ह्रीं गं घे घे स्वाहा।। नीलसरस्वतीसमेतः उच्छिष्टगणपतिः।।

११. २५०: ओं हस्तिमुखाय लम्बोदराय उच्छिष्ट-महात्मने आं क्रों ह्रीं क्लीं ह्रीं हुं घे घे उच्छिष्टाय स्वाहा।।

८३१-८३९ नीलसरस्वतीसमेतश्रीमदुच्छिष्टगणपतिः।।

१२.३७२-७५: गं।। एकाक्षरगणपतिः।।

१३.३७६-७७: ग्लौं।। उच्छिष्टगणपतिः।।

५३२

१४.३७८-७९ गों।। उच्छिष्टगणपतिः।।

१५.३८०-८५: ह्रीं विरि विरि गणपति वर वरद सर्वलोकं मे वशमानय स्वाहा।।१।।

ह्लीं विरि विरि गणपति सर्वं मे वशमानय स्वाहा॥२॥

विरि विरि गणपति सर्वं मे वशमानय स्वाहा॥३॥

गं ग्लौं क्लीं ह्लीं श्रीं ओं ह्लीं विरि विरि गणपति वर वरद सर्वलोकं मे वशमानय स्वाहा॥४॥ इति विरिगणेशभेदाः॥

१६.३८६-९०: श्रीं गं सौम्याय महागणपतये वर वरद सर्वजनं मे वशमानय स्वाहा॥ लक्ष्मीगणपतिः॥

१७.३९१-९३: ह्लीं ग्रीं ह्लीं॥ शक्तिगणपतिः॥

१८.३९४-९६: ओं ह्लीं ग्रीं ह्लीं॥ चतुरक्षरशक्तिगणपतिः॥

१९.३९७-९९: गं क्षिप्रप्रसादनाय नमः॥ क्षिप्रप्रसादनगणपतिः॥

२०.४००-०३: ओं गूं नमः॥ हेरम्बगणपतिः॥

२१.४०४-०८: ओं वचद्भुवे नमः॥सुब्रह्मण्यगणपतिः॥

४०९-४८: महागणपतिमन्त्रराजमहिमा वर्ण्यते॥

२२.४४९-५१: वक्रतुण्डैकदंष्ट्राय क्लीं ह्लीं श्रीं गं गणपति वर वरद सर्वजनं मे वशमानय स्वाहा॥ वक्रतुण्डगणपतिः॥

२३.४५२-५५: ह्लीं गं ह्लीं महागणपतये स्वाहा॥ शक्तीशः॥

२४.४५६-५७: ओं ह्रीं गं ह्रीं वशमानय स्वाहा॥ भोग-गणपतिः॥

२५.४५८-६३: ओं हूं गं ग्लौं हरिद्रागणपतये वर वरद सर्वजनहृदयं स्तम्भय स्तम्भय स्वाहा॥ हरिद्रागणपतिः॥

२६.४६४-६९: वक्रतुण्डाय हुम्॥ वक्रतुण्डगणपतिः॥

२७.४७०-७१: मेघोल्काय स्वाहा॥ वक्रतुण्डगणपतिः॥

२८.४७२-७३: रायस्पोषस्य दयिता निधिदो रत्नदोवदम्। रक्षोहणो वो वलगहनो मेघोल्काय स्वाहा॥ आथर्वणवक्रतुण्डगणपतिः॥

२९.४७४ : तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात्॥वक्रतुण्डगायत्री॥

३०.५२८ : ऐं गं ऐं॥ वाक्सिद्धिविधायकगणपतिः॥

३१.५३७ : गः॥ एकाक्षरगणपतिः॥

३२.५३८ : गः॥ एकाक्षरगणपतिः॥

३३.८१४ : ओं श्रीं ह्रीं ह्सौः हुं फट् नीलसरस्वत्यै स्वाहा॥

ओं ह्रीं ह्रां हुं नमस्तारायै महातारायै सकलदुस्तरं तारय तारय तर तर स्वाहा॥

ऐं ह्रीं श्रीं क्लीं सौं क्लीं ह्रीं ऐं ब्लूं स्त्रीं नीलतारे सरस्वति द्रां द्रीं क्लीं ब्लूं सः ऐं ह्रीं श्रीं क्लीं सौः सौः ह्रीं स्वाहा॥३॥

ब्लूं वें वद वद त्रीं हुं फट्॥४॥ इति नीलामन्त्रभेदाः॥

३४.८६२-९०३: महामहापादुका अत्र उद्धृता गुरुमुखैकसंवेद्या॥ लघुमहापादुकापि गुरुमुखैकवेद्या॥

३५.९५२ : सप्तत्रिंशन्मन्त्रराजशरीरा रश्मिमाला ललितामहात्रिपुरसुन्दरीपराभट्टारिकोपासकानां सुविज्ञातचरैव॥

३६.९५४ : महामहापादुकायाः अष्टोत्तरशतकलान्यासः गुरुमुखैकवेद्योऽतिगुप्तस्वरूपः॥

॥ नामसहस्रकन्यासः॥

गुह्यनामसहस्रके पञ्चविंशत्त्युत्तरशतनामात्मकभागाष्टकवत्त्वेन नामानि विभज्य अष्टतारीसंयोजितप्रतिनाम शिरआदिषु अष्टसु स्थानेषु न्यसेत्॥ प्रतिस्थानं पञ्चविंशत्त्युत्तरशतं नामानि भवन्ति॥ गुरुमुखात् ज्ञातव्योऽयं न्यासः॥

गुह्यनामसहस्रेण न्यासं कुर्वन्दिने दिने।
उपासकवरिष्ठोऽयं भवेद् गणपतिः स्वयम्॥

॥ श्रीः ॥

॥ श्रीमहागणपतिनित्य-(काम्य-) होमविधानम् ॥

तत्रादौ पूजामण्डपस्य ईशानभागे चतुस्राकारं हस्तमानमितमङ्गुष्ठोन्नतं (होमसंख्यानुसारिपरिमाणवद्वा) स्थण्डिलं परिकल्प्य, तद् गोमयेनोपलिप्य, स्थण्डिलसमीपे नित्यपूजोक्तविधिना स्वासनामास्तीर्य, आसनपूजां संविधाय, तत्र प्राङ्मुखः उपविश्य, महागणपतिमूलमन्त्रेण प्राणायामं कृत्वा, ऋष्यादिकराङ्गन्यासान् विन्यस्य, यथावकाशं गणेशादिन्यासान् अपि चतुरावृत्तितर्पणादौ उक्तान् विन्यस्य, देवतां ध्यात्वा मानसोपचारैः सम्पूज्य, मूलं अष्टोत्तरशतवारं अष्टविंशतिवारं वा जपित्वा, जपं समर्प्य, श्रीगुरुं प्रणम्य, स्थण्डिलसंस्कारान् कुर्यात्॥ तत्रादौ स्थण्डिलं मूलमन्त्रेण वीक्ष्य, अस्त्रमन्त्रेण प्रोक्ष्य, अस्त्रेणैव कुशैस्त्रिः संताड्य, कवचेन अभ्युक्ष्य, अस्त्रेण स्थण्डिलमध्ये किञ्चित् खात्वा, अस्त्रमन्त्रेण तां मृदं अङ्गुष्ठानामिकाभ्यां उद्धृत्य, बहिस्त्यक्त्वा, हृन्मन्त्रेण शुद्धमृत्तिकया खातमापूर्य, अस्त्रमन्त्रेण समीकृत्य, कवचमन्त्रेण जलैः संसिच्य अस्त्रमन्त्रेण काष्ठादिना कुट्टयित्वा,

दृढीकृत्य, कवचमन्त्रेण कुशैः स्थण्डिलं सम्मार्ज्य, कवचेनैव गोमयाद्भिः संलिप्य, कवचेनैव अग्निसूर्यसोमानामष्टात्रिंश-त्कलारूपं सञ्चिन्त्य, कवचेनैव मेखलात्रयेऽपि त्रिगुणीकृतसूत्रेण प्रतिमेखलं त्रिस्त्रिः संवेष्ट्य, ''ओं चतुरश्रकुण्डाय एतदासनं नमः'' इत्याद्यासनादिदीपान्तैरुपचारैः सम्पूज्य, तथैव नाभिं च सम्पूज्य, मेखलात्रयं तथैव हृन्मन्त्रेण सम्पूज्य, अस्त्रमन्त्रेण स्थण्डिलं वज्रवद्दृढं सञ्चिन्त्य, हृन्मन्त्रेण कुशैः स्थण्डिलस्य चतुर्दिक्षु वह्निज्वालाविलासाय चतुष्पथं मार्गचतुष्टयं परिकल्प्य, कवचमन्त्रेण अच्छिन्नाग्रैः कुशैः अस्त्रमन्त्राभिमन्त्रितैः स्थण्डिल-भित्तिगणं सर्वमाच्छादयन् अक्षपाटनं कुर्यात्।। इत्यष्टादश संस्कारान् कुर्यात्।। अशक्तौ प्रथमोदितैः चतुर्भिरेव संस्कारैः स्थण्डिलं संस्कृत्य, तत्र हृन्मन्त्रेणास्त्रमन्त्रेण वा दक्षिणमध्यो-त्तरेषु प्रागग्राः, पश्चिममध्यपूर्वेषु उदगग्राः इति तिस्त्रः तिस्त्रः रेखाः कुशमूलेन विलिख्य, तासु रेखासु उल्लेखक्रमेण पूजयेत्।।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ब्रह्मणे नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं यमाय नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं सोमाय नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं रुद्राय नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं विष्णवे नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं इन्द्राय नमः।। इति।।

ततः स्वदेहे षडङ्गन्यासं कुर्यात्। यथा—

ओं श्रीं ह्रीं क्लीं ग्लौं गं सहस्रार्चिषे हृदयाय नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं स्वस्तिपूर्णाय शिरसे स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं उत्तिष्ठपुरुषाय शिखायै वषट्।

ओं श्रीं ह्रीं क्लीं ग्लौं गं धूमव्यापिने कवचाय हुम्।

ओं श्रीं ह्रीं क्लीं ग्लौं गं सप्तजिह्वाय नेत्रत्रयाय वौषट्।

ओं श्रीं ह्रीं क्लीं ग्लौं गं धनुर्धराय अस्त्राय फट्॥

अनेनैव षडङ्गेन अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च स्थण्डिलं अभ्यर्च्य, तत्र अष्टकोणषट्कोणत्रिकोणात्मकं अग्निचक्रं प्रवेशरीत्या विलिख्य, त्रिकोणे दिगष्टकं विभाव्य, तत्र स्वाग्रादिप्रादक्षिण्येन दिक्षु मध्ये च क्रमेण–

ओं श्रीं ह्रीं क्लीं ग्लौं गं पीतायै नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं श्वेतायै नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं अरुणायै नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं कृष्णायै नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं धूम्रायै नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं तीव्रायै नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं स्फुलिङ्गिन्यै नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं रुचिरायै नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ज्वालिन्यै नमः॥ इति पीठशक्तीरर्चयेत्॥

ततः पीठमध्ये—

ओं श्रीं ह्रीं क्लीं ग्लौं गं तं तमसे नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं रं रजसे नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं सं सत्त्वाय नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं आं आत्मने नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं अं अन्तरात्मने नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं पं परमात्मने नमः।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ह्रीं ज्ञानात्मने नमः॥ इति पूजयेत्॥

ततस्त्रिकोणे—

ओं श्रीं ह्रीं क्लीं ग्लौं गं ह्रीं ओं वागीश्वरीवागीश्वराभ्यां नमः॥

इति मन्त्रेण, जनिष्यमाणस्य वह्नेः पितरौ वागीश्वरी-वागीश्वरौ सम्पूज्य, वागीश्वरीमृतुस्नातां वागीश्वरं देवं कामोन्मत्तं च विचिन्त्य, तयोर्मिथुनीभावं भावयित्वा, सूर्यकान्तादिभवं अरणिभवं वा वह्निमुत्पाद्य, श्रोत्रियगृहाद्वाऽऽनीय, स्वर्णादिपात्रे मृत्पात्रं चेत् नूतने, अग्निं स्थण्डिलाद् बहिः आग्नेय्यां ऐशान्यां नैर्ऋत्यां वा दिशि निधाय, तन्मध्यात् क्रव्यादांशं एकमङ्गारं फट् इति अस्त्रमन्त्रेण नैर्ऋत्यां परित्यज्य, देवांशं मूलेन

वीक्ष्य, अस्त्रेण प्रोक्ष्य, अस्त्रेण कुशैः सन्ताड्य, कवचेनाभ्युक्ष्य, धेनुयोनिमुद्रे प्रदर्श्य, ततः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ओं रं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा–

इति स्वमूलाधारस्थवह्निमण्डलगतपरमात्मस्वरूपाग्नीषोमात्मकाद्बिन्दोः सकाशाद्वह्निं, मणिपूरगतजाठरानलेन सह सुषुम्नामार्गेण वहन्नासापुटाध्यना निष्कास्य, रमिति वह्निबीजमुच्चरन्, पुरतः पात्रस्थिते वह्नौ वह्निचैतन्यं संयोज्य, औदर्यवैन्दवपार्थिववह्निनामैक्यं विभावयन्, वागीश्वर-बीजस्य वागीश्वरीयोन्यां निहितत्वेन सुदृढं विभावयेत्।।

ततः–

ओं श्रीं ह्रीं क्लीं ग्लौं गं कवचाय हुम्,

इति मन्त्रेण इन्धनैराच्छाद्य,

ओं श्रीं ह्रीं क्लीं ग्लौं गं अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। सुवर्णवर्णममलं समिद्धं विश्वंतोमुखम्।।

इति उपस्थाप्य,

ओं श्रीं ह्रीं क्लीं ग्लौं गं उत्तिष्ठ पुरुष हरितपिङ्गल लोहिताक्ष सर्वकर्माणिसाधय मे देहि दापय स्वाहा–

इति वह्निमुत्थाप्य, ततः 'ह्रीं ओं' इति स्थण्डिलोपरि अग्निं त्रिवारं भ्रामयित्वा, स्थण्डिले स्थापयेत्।। वागीश्वरी-

वागीश्वरयोः मैथुनं विभाव्य, देवदेव्योराचमनं दत्त्वा,

ओं श्रीं ह्रीं क्लीं ग्लौं गं 'चित्पिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा॥'

इति मन्त्रमुच्चरन् मुखेन फूत्कृत्य, कुशैरग्निं प्रज्वाल्य, काष्ठैः पटूकृत्य, ज्वालिनीमुद्रां प्रदर्श्य, वागीश्वरीगर्भे धृतं ध्यात्वा,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य होमाग्नेः गर्भाधानकर्म कल्पयामि नमः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य होमाग्नेः पुंसवनकर्म कल्पयामि नमः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य होमाग्नेः सीमन्तोन्नयनकर्म कल्पयामि नमः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य होमाग्नेः जातकर्म कल्पयामि नमः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य होमाग्नेः महागणपत्यग्निरिति नामकरणकर्म कल्पयामि नमः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य महागणपत्यग्नेः अन्नप्राशनकर्म कल्पयामि नमः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य महागणपत्यग्नेः चौलकर्म कल्पयामि नमः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य महागणपत्यग्नेः उपनयनकर्म कल्पयामि नमः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य महागणपत्यग्नेः गोदानकर्म कल्पयामि नमः,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं नमः अस्य महागणत्पयग्नेः विवाहकर्म कल्पयामि नमः–

इति तत्तत्कर्मभावनया अक्षतैरभ्यर्चयेत्।।

ततः सामान्यार्घ्योदकेन अग्निं मूलेन परिषिच्य, अग्निमलंकृत्य, प्रागग्रैरुदगग्रैश्च कुशैः परिस्तीर्य, उत्तरतो दर्भानास्तीर्य, दर्वीं आज्यस्थालीं प्रोक्षणीं प्रणीतां इतरदर्वीं इध्मं च द्वन्द्वन्यञ्चि (अधोबिलं) पात्राणि सादयित्वा, द्वौ दर्भौ प्रादेशमात्रे पवित्रे कृत्वा, अद्भिरनुमृज्य, सामान्यार्घ्योद्केन षट् पात्राणि प्रोक्ष्य, प्रोक्षणीपात्रमादाय पुरतो निधाय, अक्षतैः सह सामान्यार्घ्योदकेन पूरयित्वा, हस्तयोः अङ्गुष्ठोपकनिष्ठि-काभ्यां उदगग्राभ्यां पवित्राभ्यां मूलेन त्रिः प्रागुत्पूय, मूलेन सप्तधा अभिमन्त्र्य, उत्तानानि पात्राणि कृत्वा, इध्मं विस्त्रस्य त्रिः प्रोक्ष्य, प्रोक्षणीपात्रं दक्षिणतो निधाय, प्रणीतापात्रमादाय पुरतो निधाय, पवित्रे तस्मिन् निधाय, अक्षतैः सह अंकुशमुद्रया मूलेन सामान्यार्घ्योदकेन पूरयित्वा, पूर्ववदुत्पूय, घ्राणसम-मुद्धृत्य, पात्रासादनादुत्तरतो दर्भेषु सादयित्वा,

वरुणाय नमः,

–इति गन्धपुष्पाक्षतैरभ्यर्च्य,

दर्भैः प्रच्छाद्य, पवित्रे आज्यपात्रे निधाय, अग्नेः दक्षिणतो ब्रह्माणं दर्भेषु निषाद्य,

'अस्मिन् श्रीमहागणपतिहोमकर्मणि ब्रह्माणं त्वं वृणे'– ओं ब्रह्मणे नमः सकलाराधनैः स्वर्चितं

–इति ब्रह्मवरणपूजने कुर्यात्॥

(ऋत्विग्वरणमपि यथावश्यकं कर्तव्यम्)

अपरेणाग्निं पवित्रान्तर्हितायां आज्यस्थाल्यां आज्यं निरुप्य उदीचोऽङ्गारान् निरूह्य, तेषु आज्यं अधिश्रित्य, ज्वलता तृणेन अवद्योत्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाल्य प्रत्यस्य त्रिः पर्यग्निकृत्वा, उदगुद्वास्य, अङ्गारान्प्रत्यूह्य, आज्यस्थालीं स्वपुरतो निधाय, मूलेन सप्तवारमभिमन्त्र्य, ईक्षणप्रोक्षण-ताडनावकुण्ठानि कृत्वा, उदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय, पवित्रग्रन्थिं विस्रस्य, अप उपस्पृश्य, प्रागग्रं अग्नौ प्रहरति।

अथ दर्व्यौ अग्नौ परितप्य दर्भैः सम्मृज्य, पुनः प्रतितप्य, प्रोक्ष्य, निधाय, दर्भान् अद्भिः संस्पृश्य, अग्नौ प्रहरति॥

इध्ममादाय परिधीन् परिदधाति–स्थूलं उदगग्रं पश्चात्, अणीयांसं दीर्घं प्रागग्रं दक्षिणतः, अणिष्ठं ह्रसिष्ठं प्रागग्रं उत्तरतः, अग्निपरिस्तरणयोर्मध्ये, अन्योन्यसंस्पृष्टान् विधाय, मध्यमं परिधिं दक्षिणहस्तेनोपस्पृश्य, अग्नेः दक्षिणपूर्व-उत्तरपूर्वदिशयोः आघारसमिधौ निधाय, अथाग्निं परिषिञ्चति–

अदितेनुमन्यस्व,

अनुमतेनुमन्यस्व,

सरस्वतेनुमन्यस्व,

देव सवितः प्रसुव, इति परिषिच्य, अग्निमलंकृत्य, इध्ममादाय, द्विरभिघार्य, मूलमध्ययोः मध्यं मृगीमुद्रया गृहीत्वा 'अस्मिन् श्रीमहागणपतिहोमकर्मणि ब्रह्मन् इध्मं आधास्ये,' इति ब्रह्माणमनुज्ञाप्य, 'ओं आधत्स्व' इति तेन अनुज्ञातः, हस्ताभ्यां इध्मं आदधाति। स्रुवेण आज्यं आदाय तूष्णीं आघारावाघारयति।। यथा–

(इतरदर्व्या) वायव्यादाग्नेयान्तं–स्वाहा। प्रजापतय इदं न मम।

(प्रधानदर्व्या) नैर्ऋत्यादीशानान्तं–स्वाहा। इन्द्रायेदं न मम।

(उत्तरार्धपूर्वार्धे) अग्नये स्वाहा। अग्नय इदं।

(दक्षिणार्धपूर्वार्धे) सोमाय स्वाहा। सोमायेदं।

(समं पूर्वेण मध्ये) अग्नये स्वाहा। अग्नय इदम्।।

आरम्भप्रभृति एतत्क्षणपर्यन्तं मध्ये सम्भावितसमस्त-दोषप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि। ओं भूर्भुवः सुवः स्वाहा। प्रजापतय इदम्।।

अथाग्निं ध्यायेत्–

त्रिणयनमरुणप्ताबद्धमौलिं सुशुक्लां
शुकमरुणमनेकाकल्पमम्भोजसंस्थम् ।
अभिमतवरशक्तिं स्वस्तिकाभीतिहस्तं
नमत कनकमालालंकृतांसं कृशानुम्।।

वैश्वानरं स्थितं ध्यायेत्समिद्धोमेषु देशिकः।
शयानमाज्यहोमेषु निषण्णं शेषवस्तुषु॥

अथ अष्टकोणे स्वाग्रादिप्रादक्षिण्येन–

ओं श्रीं ह्रीं क्लीं ग्लौं गं जातवेदसे नमः।
ओं श्रीं ह्रीं क्लीं ग्लौं गं सप्तजिह्वाय नमः।
ओं श्रीं ह्रीं क्लीं ग्लौं गं हव्यवाहनाय नमः।
ओं श्रीं ह्रीं क्लीं ग्लौं गं अश्वोदराय नमः।
ओं श्रीं ह्रीं क्लीं ग्लौं गं वैश्वानराय नमः।
ओं श्रीं ह्रीं क्लीं ग्लौं गं कौमारतेजसे नमः।
ओं श्रीं ह्रीं क्लीं ग्लौं गं विश्वमुखाय नमः।
ओं श्रीं ह्रीं क्लीं ग्लौं गं देवमुखाय नमः।

–इति अभिपूज्य

षट्कोणे षडङ्गार्चनं कुर्यात्। यथा–

ओं श्रीं ह्रीं क्लीं ग्लौं गं सहस्रार्चिषे हृदयाय नमः।
ओं श्रीं ह्रीं क्लीं ग्लौं गं स्वस्तिपूर्णाय शिरसे स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं उत्तिष्ठपुरुषाय शिखायै वषट्।
ओं श्रीं ह्रीं क्लीं ग्लौं गं धूमव्यापिने कवचाय हुम्।
ओं श्रीं ह्रीं क्लीं ग्लौं गं सप्तजिह्वाय नेत्रत्रयाय वौषट्।
ओं श्रीं ह्रीं क्लीं ग्लौं गं धनुर्धराय अस्त्राय फट्।

इति॥

त्रिकोणे–

ओं श्रीं ह्रीं क्लीं ग्लौं गं ओं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा–इति मन्त्रेण अग्निं पुष्पाक्षतैः अर्चयेत्॥

अथ अग्नेः सप्तजिह्वासु एकैकां आज्याहुतिं कुर्यात्॥ यथा–

ओं श्रीं ह्रीं क्लीं ग्लौं गं हिरण्यायै नमः स्वाहा–
हिरण्याया इदं न मम (ऐशान्यां)

ओं श्रीं ह्रीं क्लीं ग्लौं गं कनकायै नमः स्वाहा–
कनकाया इदं न मम (प्राच्यां)

ओं श्रीं ह्रीं क्लीं ग्लौं गं रक्तायै नमः स्वाहा–
रक्ताया इदं न मम (आग्नेय्यां)

ओं श्रीं ह्रीं क्लीं ग्लौं गं कृष्णायै नमः स्वाहा–
कृष्णाया इदं न मम (नैर्ऋत्यां)

ओं श्रीं ह्रीं क्लीं ग्लौं गं सुप्रभायै नमः स्वाहा–
सुप्रभाया इदं न मम (पश्चिमायां)

ओं श्रीं ह्रीं क्लीं ग्लौं गं अतिरिक्तायै नमः स्वाहा–
अतिरिक्ताया इदं न मम (वायव्यां)

ओं श्रीं ह्रीं क्लीं ग्लौं गं बहुरूपायै नमः स्वाहा–
बहुरूपाया इदं न मम (मध्ये)

ततस्तिस्र आहुतीर्जुहुयात्। यथा–

ओं श्रीं ह्रीं क्लीं ग्लौं गं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा–अग्नय इदम्।

ओं श्रीं ह्रीं क्लीं ग्लौं गं उत्तिष्ठपुरुष हरितपिङ्गल लोहिताक्ष सर्वकर्माणि साधय मे देहि दापय स्वाहा–अग्नय इदम्।

ओं श्रीं ह्रीं क्लीं ग्लौं गं चित्पिङ्गल हन हन दह दह पच पच सर्वज्ञाज्ञापय स्वाहा–अग्नय इदम्॥

अथ अग्नेर्मध्यभागे स्थितायां दक्षिणोत्तरायतायां बहुरूपाख्यजिह्वायां,

ओं श्रीं ह्रीं क्लीं ग्लौं गं (गणपतिमूलं) गणानां त्वा गणपतिꣳहवामहे कविं कवीनामुपमश्रवस्तमम्। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम्॥ श्रीमहागणपतिमा-वाहयामि॥ इति महागणपतिमावाह्य, उपचारमन्त्रैः गन्धादीन् पञ्चोपचारान् आचर्य, पूजाक्रमेण जुहुयात्। यथा–

ओं श्रीं ह्रीं क्लीं ग्लौं गं (महागणपतिमूलं) श्रीमहागणपतये स्वाहा–(त्रिः) अनन्तरं नवपीठशक्तीर्जुहुयात्। यथा–

ओं श्रीं ह्रीं क्लीं ग्लौं गं तीव्रायै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ज्वालिन्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं नन्दायै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं भोगदायै स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं कामरूपिण्यै स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं उग्रायै स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं तेजोवत्यै स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं सत्यायै स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं विघ्ननाशिन्यै स्वाहा। इति॥

अनन्तरं धर्माद्यष्टकं जुहुयात्। यथा—

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऋं धर्माय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं ॠं ज्ञानाय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं ऌं वैराग्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं ॡं ऐश्वर्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं ऋं अधर्माय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं ॠं अज्ञानाय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं ऌं अवैराग्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं ॡं अनैश्वर्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं (महागणपतिमूलं) श्रीमहागणपतये स्वाहा। (१०)
ओं श्रीं ह्रीं क्लीं ग्लौं गं ओं गां हृदयाय नमः हृदयदेव्यै स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं श्रीं गीं शिरसे स्वाहा शिरोदेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ह्रीं गूं शिखायै वषट् शिखादेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्लीं गैं कवचाय हुम् कवचदेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ग्लौं गौं नेत्रत्रयाय वौषट् नेत्रदेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं गं गः अस्त्राय फट् अस्त्रदेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं विनायकसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं कवीश्वरसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं विरूपाक्षसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं विश्वसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ब्रह्मण्यसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं निधीशसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं राजाधिराजसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं वरदसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं विजयसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं दुर्जयसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं जयसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं दुःखारिसिद्धाचार्याय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं सुखावहसिद्धाचार्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं परमात्मसिद्धाचार्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं सर्वभूतात्मसिद्धाचार्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं महानन्दसिद्धाचार्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं फालचन्द्रसिद्धाचार्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं सद्योजातसिद्धाचार्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं बुद्धसिद्धाचार्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं शूरसिद्धाचार्याय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं श्रीं श्रीसहितनारायणाय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं ह्रीं गिरिजासहितहराय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं क्लीं रतिसहितमन्मथाय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं ग्लौं महीसहितवराहाय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं श्रीङ्गं महालक्ष्मीसहितमहागणपतये स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं श्रीङ्गं ऋद्धिसहितामोदाय स्वाहा।
ओं श्रीं ह्रीं क्लीं ग्लौं गं श्रीङ्गं समृद्धिसहितप्रमोदाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्लीङ्गं कान्तिसहितसुमुखाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्लीङ्गं मदनावतीसहितदुर्मुखाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्लीङ्गं मदद्रवासहिताविघ्नाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्लीं गं द्राविणीसहितविघ्नकर्त्रे स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ह्रीङ्गं वसुधारासहितशङ्खनिधये स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ग्लौङ्गं वसुमतीसहितपद्मनिधये स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ओङ्गां हृदयाय नमः। हृदयदेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं श्रीङ्गीं शिरसे स्वाहा। शिरोदेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ह्रीङ्गूं शिखायै वषट्। शिखादेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्लीङ्गैं कवचाय हुम्। कवचदेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ग्लौङ्गौं नेत्रत्रयाय वौषट्। नेत्रदेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं गङ्गः अस्त्राय फट्। अस्त्रदेव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं आं ब्राह्म्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ईं माहेश्वर्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऊं कौमार्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ॠं वैष्णव्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ॡं वाराह्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं माहेन्द्र्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं औं चामुण्डायै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं अः महालक्ष्म्यै स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं लं ऐरावतवाहनाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं रं अजवाहनाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं टं महिषवाहनाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्षं नरवाहनाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं वं मकरवाहनाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं यं रुरुवाहनाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं सं अश्ववाहनाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं हं वृषभवाहनाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं लं वज्रायुधाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं रं शक्त्यायुधाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं टं दण्डायुधाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्षं खड्गायुधाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं वं पाशायुधाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं यं ध्वजायुधाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं सं शङ्खायुधाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं हं त्रिशूलायुधाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं लं सपरिवारसुराधिपतिवासवाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं रं सपरिवारतेजोधिपतिवैश्वानराय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं टं सपरिवारप्रेताधिपतिधर्मराजाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं क्षं सपरिवाररक्षोधिपतिनिर्ऋतये स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं वं सपरिवारजलाधिपतिवरुणाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं यं सपरिवारप्राणाधिपतिश्वसनाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं सं सपरिवारनक्षत्राधिपतिसोमाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं हं सपरिवारविद्याधिपतिभूतेशाय स्वाहा।

ओं श्रीं ह्रीं क्लीं ग्लौं गं (मूलं) पञ्चावृतिचक्रेशाय श्रीमहागणपतये स्वाहा (दशकृत्वः)।।

अथ पुरश्चरणाङ्गत्वेन अष्टद्रव्यहोमं महागणपतिमूलमन्त्रेण करिष्ये।।

ओं श्रीं ह्रीं क्लीं ग्लौं गं (मूलं) स्वाहा (इति मोदकैः पृथुकैः लाजैः सक्तुभिः इक्षुपर्वभिः नारिकेलैः तिलैः कदलीफलैश्च प्रतिद्रव्यं सम-संख्याकतया होतव्यम्। मोदकाः अखण्डिताः ग्रासमिताः। पृथुकलाजसक्तवो मुष्टिपरिमिताः। इक्षुखण्डाः पर्वमिताः। नारिकेलं अष्टधा खण्डितम्। तिलाः चुलुकमात्राः। कदलीफलं अल्पं चेद्खण्डितम्, पृथु चेद्यथारुचि खण्डितम्। अमीषां द्रव्याणां मधुक्षीरघृतसिक्तानां पृथक्पृथगाहुतयः। पूर्वमेव सामान्यार्घ्योदकेन विशेषार्घ्यतीर्थेण च प्रोक्षितत्वात् पवित्रीकृतानि द्रव्याणि आज्याक्तत्वेन द्विगुणं संस्कृतानि भवन्ति।। होमसंख्याभेदेन कुण्डमानभेदोऽप्यत्र ज्ञातव्यः।।)

ततो होमावशिष्टेनाज्येन स्रुचं पूरयित्वा पुष्पं फलं अग्रे निधाय, स्रुवेणाच्छाद्य, मूलेन वौषट् इति उत्थितो जुहुयात्।। ततो बलिदानं कर्तव्यम्। यथा–

पुरतः स्ववामभागे त्रिकोणवृत्तचतुरश्रात्मकं मण्डलं सामान्यार्घ्योदकेन मत्स्यमुद्रया विलिख्य,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ऐं व्यापकमण्डलाय नमः।। इति मण्डलं अभ्यर्च्य, अर्धभक्तपूरितोदकं सक्षीरादित्रयं ताम्रपात्रं तत्र निधाय,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ओं ह्रीं सर्वविघ्नकृद्भ्यो भूतेभ्यो हुं फट् स्वाहा इति मन्त्रं त्रिः पठित्वा, दक्षकरार्पितं वामकरतत्त्वमुद्रास्पृष्टं तीर्थं बल्युपरि दत्त्वा, वामपार्ष्णिघातकरास्फोटौ कृत्वा, समुदञ्चिवक्त्रो बाणमुद्रया बलिं भूतैर्ग्रासितं विभाव्य, योनिमुद्रया प्रणमेत्॥

ततो महाव्याहृतिहोमः। यथा—

ओं श्रीं ह्रीं क्लीं ग्लौं गं भूरग्नये च पृथिव्यै च महते च स्वाहा। अग्नये पृथिव्यै महत इदम्।

ओं श्रीं ह्रीं क्लीं ग्लौं गं भुवो वायवे चान्तरिक्षाय च महते च स्वाहा। वायवे अन्तरिक्षाय महत इदम्।

ओं श्रीं ह्रीं क्लीं ग्लौं गं सुवरादित्याय च दिवे च महते च स्वाहा। आदित्याय दिवे महत इदम्।

ओं श्रीं ह्रीं क्लीं ग्लौं गं भूर्भुवःसुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिगभ्यश्च महते च स्वाहा। चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यो महत इदम्॥ इति चतस्र आहुतीराज्येन कृत्वा,

ओं श्रीं ह्रीं क्लीं ग्लौं गं ओं इतः पूर्वं प्राणबुद्धि-देहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यत्कृतं यदुक्तं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। परब्रह्मण इदम्॥ इति ब्रह्मार्पणाहुतिं विदध्यात्॥

एतत्कर्मसमृद्ध्यर्थं जयादिहोमं करिष्ये।

चित्तं च स्वाहा। चित्तायेदम्॥

चित्तिश्च स्वाहा। चित्या इदम्॥

आकूतं च स्वाहा। आकूतायेदम्॥

आकूतिश्च स्वाहा। आकूत्या इदम्॥

विज्ञातं च स्वाहा। विज्ञातायेदम्॥

विज्ञानं च स्वाहा। विज्ञानायेदम्॥

मनश्च स्वाहा। मनस इदम्॥

शक्वरीश्च स्वाहा। शक्वरीभ्य इदम्॥

दर्शश्च स्वाहा। दर्शायेदम्।

पूर्णमासश्च स्वाहा। पूर्णमासायेदम्॥

बृहच्च स्वाहा। बृहत इदम्॥

रथन्तरं च स्वाहा। रथन्तरायेदम्॥

प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव स्वाहा। प्रजापतय इदम्॥

अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। अग्नय इदम्॥

इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। इन्द्रायेदम्॥

यमः पृथिव्या अधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन्

क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। यमायेदम्॥

वायुरन्तरिक्षस्याधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। वायव इदम्॥

सूर्यो दिवोऽधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। सूर्यायेदम्॥

चन्द्रमा नक्षत्राणामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। चन्द्रमस इदम्॥

बृहस्पतिर्ब्रह्मणोऽधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। बृहस्पतय इदम्॥

मित्रः सत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। मित्रायेदम्॥

वरुणोऽपामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। वरुणायेदम्॥

समुद्रः स्रोत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन्

क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। समुद्रायेदम्॥

अन्नः साम्राज्यानामधिपतिः तन्मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। अन्नायेदम्॥

सोम ओषधीनामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। सोमयेदम्॥

सविता प्रसवानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। सवित्र इदम्॥

रुद्रःपशूनामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। रुद्रायेदम्॥ अप उपस्पृश्य॥

त्वष्टा रूपाणामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। त्वष्ट्र इदम्॥

विष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा। विष्णव इदम्॥

मरुतो गणानामधिपतयस्ते मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याः स्वाहा।

मरुद्भ्य इदम्॥

पितरः पितामहाः परेवरे ततास्तततामहा इह मावत। अस्मिन्ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्याः स्वाहा। पितृभ्य इदम्॥ अप उपस्पृश्य॥

ऋताषाडृतधामाऽग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। अग्नये गन्धर्वायेदम्॥

ताभ्यः स्वाहा। ओषधीभ्योऽप्सरोभ्य इदम्॥

सँहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। सूर्याय गन्धर्वायेदम्॥

ताभ्यः स्वाहा। मरीचिभ्योऽप्सरोभ्य इदम्॥

सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो वेकुरयो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। चन्द्रमसे गन्धर्वायेदम्॥

ताभ्यः स्वाहा। नक्षत्रेभ्योऽप्सरोभ्य इदम्॥

भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः स्तवा नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। यज्ञाय गन्धर्वायेदम्॥

ताभ्यः स्वाहा। दक्षिणाभ्योऽप्सरोभ्य इदम्॥

प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्नयो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै

स्वाहा। सूर्याय गन्धर्वायेदम्।।

ताभ्यः स्वाहा। ऋक्सामभ्योऽप्सरोभ्य इदम्।।

इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरसो मुदा नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। वाताय गन्धर्वायेदम्।।

ताभ्यः स्वाहा। अद्भ्योऽप्सरोभ्य इदम्।।

भुवनस्य पते यस्य त उपरि गृहा इह च। सनोरा स्वज्यानिः रायस्पोषः सुवीर्यः संवत्सरीणाः स्वस्तिः स्वाहा। भुवनस्य पत्य इदम्।।

परमेष्ठ्यधिपतिर्मृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। मृत्यवे गन्धर्वायेदम्।।

ताभ्यः स्वाहा। विश्वस्मा अप्सरोभ्य इदम्।।

सुक्षितिर्सुभूतिर्भद्रकृथ्सुवर्वान्पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसो रुचो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। पर्जन्याय गन्धर्वायेदम्।।

ताभ्यः स्वाहा। विद्युद्भ्योऽप्सरोभ्य इदम्।।

दूरे हेतिरमृडयो मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। मृत्यवे गन्धर्वायेदम्।।

ताभ्यः स्वाहा। प्रजाभ्योऽप्सरोभ्य इदम्।।

चारुः कृपणकाशी कासो गन्धर्वस्तस्याधयोऽप्सरसः

शोचयन्तीर्नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा। कामाय गन्धर्वायेदम्॥

ताभ्यः स्वाहा। आधिभ्योऽप्सरोभ्य इदम्॥

स नो भुवनस्य पते यस्य त उपरि गृहा इह च। उरु ब्रह्मणेऽस्मै क्षत्राय महिशर्म यच्छ स्वाहा। भुवनस्य पत्यै ब्रह्मण इदम्॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणाँ स्वाहा। प्रजापतय इदम्॥

भूः स्वाहा। अग्नय इदम्॥

भुवः स्वाहा। वायव इदम्॥

सुवः स्वाहा। सूर्यायेदम्॥

यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्ट-थ्स्विष्टकृद्विद्वान्थ्सर्वः स्विष्टःसुहुतं करोतु स्वाहा। अग्नये स्विष्टकृत इदम्॥

चरुकर्मसु प्रधानदर्व्याज्येन निधानक्रमात् परिध्यञ्जनं कृत्वा, लेपकार्यं कुर्यात्। आज्यस्थाल्या दक्षिणतः प्रधानदर्वीं निधाय, इतरदर्वीं मध्ये निधाय, पात्रासादनार्थदर्भानादाय, प्रधानदर्व्यामग्रं इतरस्यां मध्यं आज्यस्थाल्यां मूलं इत्युदगप-वर्गं क्रमेण त्रिरक्त्वा, अक्तस्य बर्हिपरतृणमपादाय, प्रज्ञातं निधाय, दक्षिणोत्तराभ्यां पाणिभ्यां प्रधानदर्व्यां बर्हिः प्रतिष्ठाप्य, दक्षिणेन करेणाग्नौ प्रहरति। त्रिरुद्यम्य, अपात्ततृणमग्नौ

प्रहरति। तत् त्रिरङ्गुल्या निर्दिश्य, अग्निमभिमन्त्रयते। अथ भूमिमुपस्पृश्य, परिधीन्प्रहरति। मध्यमं परिधिमग्नौ प्रहृत्य, अन्यौ परिधी हस्ताभ्यामादाय युगपदग्नौ प्रहरन् उत्तरार्ध्य-स्याग्रमङ्गारेषूपोहति। दर्वीद्वयेन संस्रावं परिधीनभिजुहोति॥ (स्वाहा)॥

वसुभ्यो रुद्रेभ्य आदित्येभ्यः सँस्रावभागेभ्य इदम्॥

ओं भूर्भुवः सुवः स्वाहा। प्रजापतय इदम्॥

अस्मिन् महागणपतिहोमकर्मणि अविज्ञातप्रायश्चित्ता-दीनि होष्यामि॥

अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु। अग्ने तदस्य कल्पय त्वँ हि वेत्थ यथातथꣳ स्वाहा। अग्नय इदम्॥

पुरुषसम्मितो यज्ञो यज्ञः पुरुषसम्मितः। अग्ने तदस्य कल्पय त्वँ हि वेत्थ यथातथꣳ स्वाहा। अग्नय इदम्॥

यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्तासः। अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाꣳ ऋतुशो यजाति स्वाहा। अग्नय इदम्॥

भूः स्वाहा। अग्नय इदम्॥

भुवः स्वाहा। वायव इदम्॥

सुवः स्वाहा। सूर्यायेदम्॥

ओं भूर्भुवः सुवः स्वाहा। प्रजापतय इदम्॥

अस्मिन् श्रीमहागणपतिहोमकर्मणि मध्ये सम्भावितसम-स्तमन्त्रलोपतन्त्रलोपद्रव्यलोपक्रियालोपाज्यलोपन्यूना-

तिरेकविस्मृतिविपर्यासप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि।

ओं भूर्भुवः सुवः स्वाहा। प्रजापतय इदम्॥

श्रीविष्णवे स्वाहा। विष्णवे परमात्मन इदम्॥

नमो रुद्राय पशुपतये स्वाहा। रुद्राय पशुपतय इदम्। अप उपस्पृश्य॥

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धामप्रियाणि। सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन स्वाहा। अग्नये सप्तवत इदम्॥

आज्यपात्रादीनुत्तरतो निधाय, प्राणायामं कृत्वा, अग्निं परिषिञ्चति॥

अदितेऽन्वमँस्थाः।

अनुमतेऽन्वमँस्थाः।

सरस्वतेऽन्वमँस्थाः।

देव सवितः प्रासावीः॥

ततः प्रणीतापात्रं स्वस्य पुरतः आदाय,

''पूर्णमसि पूर्णं मे भूयाः। सदसि सन्मे भूयाः। सर्वमसि सर्वं मे भूयाः॥'' इति अन्यजलं निनीय, तज्जलं प्रागादि-प्रदक्षिणं,

प्राच्यां दिशि, देवा ऋत्विजो मार्जयन्ताम्।

दक्षिणस्यां दिशि, मासाः पितरो मार्जयन्ताम्।

प्रतीच्यां दिशि, गृहाः पशवो मार्जयन्ताम्।

उदीच्यां दिशि, आप ओषधयो वनस्पतयो माजर्यन्ताम्॥

ऊर्ध्वायां दिशि, यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्ताम्॥

इति प्रतिदिशमुत्सृज्य, पुरस्तात् अक्षतोपरि निस्राव्य, तेन–

ब्राह्मणेष्वमृतं हितं येन देवाः पवित्रेणात्मानं पुनते सदा तेन सहस्रधारेण पावमान्यः पुनन्तु मा,

इत्यात्मानं प्रोक्ष्य, दक्षिणतो निषादितं ब्रह्माणं सम्पूज्य, तस्य वरं दत्त्वा, प्रागादिपरिस्तरणमुत्तरे विसृजेत्। ऋत्विजामपि दक्षिणादि अत्र दातव्यम्॥

अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम्॥ इति।

उपस्थाय चिदग्निं,

उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्। आयुः प्रजाꣳ रयिमस्मासु धेहि अजस्रो दीदिहि नो दुरोणे॥

श्रीमहागणपत्यग्निं आत्मन्युद्वासयामि नमः, इति उद्वास्य, हृदये अञ्जलिं दद्यात्॥

तद्भूतितिलकं, "त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं अगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मेऽस्तु त्र्यायुषम्। शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिꣳसीः॥ इति मन्त्रेण धारयेत्॥

॥ इति सर्वं सुमङ्गलं शिवमवदातम् ॥

श्रीदक्षिणामूर्तिस्तोत्रम्

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥१॥

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥२॥

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान्।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥३॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जग-
त्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥४॥

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः।

मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ५ ॥
राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान्।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ६ ॥
बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ७ ॥
विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामित-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ८ ॥
भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम्।
नान्यत्किंचन विद्यते विमृशतां यस्मात्परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ९ ॥
सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च संकीर्तनात्।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम्॥ १० ॥

॥ दशश्लोकी॥

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेन्द्रियं वा न तेषां समूहः।
अनैकान्तिकत्वात्सुषुप्त्येकसिद्ध-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥१॥

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि।
अनात्माश्रयाहं ममाध्यासहाना-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥२॥

न माता पिता वा न देवा न लोका:
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति।
सुषुप्तौ निरस्तातिशून्यात्मकत्वा-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥३॥

न सांख्यं न शैवं न तत्पाञ्चरात्रं
न जैनं न मीमांसकादेर्मतं वा।
विशिष्टानुभूत्या विशुद्धात्मकत्वा-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥४॥

न चोर्ध्वं न चाधो न चान्तर्न बाह्यं
न मध्यं न तिर्यङ् न पूर्वा परा दिक्।
वियद्व्यापकत्वादखण्डैकरूप-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥५॥

न शुक्लं न कृष्णं न रक्तं न पीतं
न कुब्जं न पीनं न ह्रस्वं न दीर्घम्।
अरूपं तथा ज्योतिराकारकत्वा-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ६ ॥

न शास्ता न शास्त्रं न शिष्यो न शिक्षा
न च त्वं न चाहं न चायं प्रपञ्चः।
स्वरूपावबोधो विकल्पासहिष्णु-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ७ ॥

न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तैजसः प्राज्ञको वा।
अविद्यात्मकत्वात्त्रयाणां तुरीय-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ८ ॥

अपि व्यापकत्वाद्धि तत्त्वप्रयोगा-
त्स्वतः सिद्धभावादनन्याश्रयत्वात्।
जगत्तुच्छमेतत्समस्तं तदन्य-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम्॥ ९ ॥

न चैकं तदन्यद्द्वितीयं कुतः स्या-
न्न वा केवलत्वं न चाकेवलत्वम्।
न शून्यं न चाशून्यमद्वैतकत्वा-
त्कथं सर्ववेदान्तसिद्धं ब्रवीमि॥१०॥

॥ मनीषापञ्चकम्॥

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृम्भते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञा हि यस्यास्ति चे-
च्चाण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम॥१॥

ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं
सर्वं चैतदविद्यया त्रिगुणया सेशं मया कल्पितम्।
इत्थं यस्य दृढा मतिः सुखतरे नित्ये परे निर्मले
चाण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम॥२॥

शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरो-
र्नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याजशान्तात्मना।
भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके
प्रारब्धाय समर्पितं स्ववपुरित्येषा मनीषा मम॥३।

या तिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटा गृह्यते
यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः।
तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावय-
न्योगी निर्वृतमानसो हि गुरुरित्येषा मनीषा मम॥४॥

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः।
यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मवि-
द्यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा मम॥५॥

॥ श्रीजगद्गुर्वष्टकम्॥

विदिताखिलशास्त्रसुधाजलधे महितोपनिषत्कथितार्थनिधे।
हृदये कलये विमलं चरणं भव शङ्करदेशिक मे शरणम्॥१॥
करुणावरुणालय पालय मां भवसागरदुःखविदूनहृदम्।
रचयाखिलदर्शनतत्त्वविदं भव शङ्करदेशिक मे शरणम्॥२॥
भवता जनता सुहिता भविता निजबोधविचारणचारुमते।
कलयेश्वरजीवविवेकविदं भव शङ्करदेशिक मे शरणम्॥३॥
भव एव भवानिति मे नितरां समजायत चेतसि कौतुकिता।
मम वारय मोहमहाजलधिं भव शङ्करदेशिक मे शरणम्॥४॥
सुकृतेऽधिकृते बहुधा भवतो भविता समदर्शनलालसता।
अतिदीनमिमं परिपालय मां भव शङ्करदेशिक मे शरणम्॥५॥
जगतीमवितुं कलिताकृतयो विचरन्ति महामहसश्छलतः।
अहिमांशुरिवात्र विभासि गुरो भव शङ्करदेशिक मे शरणम्॥६॥
गुरुपुङ्गव पुङ्गवकेतन ते समतामयतां न हि कोऽपि सुधीः।
शरणागतवत्सल तत्त्वनिधे भव शङ्करदेशिक मे शरणम्॥७॥
विदिता न मया विशदैककला न च किञ्चन काञ्चनमस्ति गुरो।
द्रुतमेव विधेहि कृपां सहजां भव शङ्करदेशिक मे शरणम्॥८॥